अंक ४

संस्कृत-पाठ-माला

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

चतुर्थ भाग ।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मंडल, साहित्यवाचस्पति, गीतालंकार

नवम वार

संवत् २०११, शाके १८७६, सन् १९५५

अंक ४ ॐ

संस्कृत-पाठ-माला

[संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय]

चतुर्थ भाग ।

लेखक

पं. श्रीपाद दामोदर सातवलेकर

अध्यक्ष- स्वाध्याय-मंडल, साहित्यवाचस्पति, गीतालंकार

नवम वार

संवत् २०११, शके १८७६, सन् १९५५

विशेष सूचना

संस्कृतमें संधिविचारका महत्त्व विशेष है। इस संधिप्रकरणको अति सुबोध रीतिसे इस पुस्तकमें दिया है। इतने नियम ध्यानमें रखनेसे संधिके साथ पाठकोंका परिचय हो जायगा।

इस पुस्तकमें संस्कृत गद्य, तथा श्लोकोंके पाठ दिये हैं। उनका अभ्यास करनेसे पाठक संस्कृतमें अति शीघ्र प्रविष्ट हो सकते हैं।

संधि खोलकर पाठ प्रथम दिये हैं और उनका ही संधि बनाकर सरल संस्कृत पीछेसे दिया है। दोनोंकी तुलना करनेसे पाठकोंको बडा लाभ पहुंच सकता है। आशा है कि पाठक इस शैलीसे अभ्यास करके लाभ उठायेंगे।

लेखक
पं. श्रीपाद दामोदर सातवलेकर

प्रकाशक और मुद्रक :
वसंत श्रीपाद सातवलेकर, बी. ए.
स्वाध्याय मण्डल, भारत-मुद्रणालय, आनंदाश्रम, पारडी [जि. सूरत]

ॐ

संस्कृत-पाठ-माला

चतुर्थ भागः ।

पाठ १

संधि-विचार

संस्कृतमें संधिविचार प्रथम स्थान रखता है। इस समय जो वाक्य पाठकोंको दिये हैं, वे विना संधिके दिये हैं। अब इस पाठमें कुछ संधिके नियम बताये जायेंगे। इन नियमोंको यदि पाठक थोडा थोडा ध्यानमें रखेंगे, तो उनको संधियोंका बहुतसा ज्ञान हो जायगा।

संधियोंमें स्वरसंधि और व्यञ्जनसंधि ऐसे दो भाग हैं। दो स्वरोंके जो संधि होते हैं, उनको स्वरसंधि कहते हैं और दो व्यञ्जनोंके जो संधि होते हैं, उनको व्यञ्जनसंधि कहते हैं। व्यञ्जन और स्वरोंका भी संधि होता ही है। इनका स्वरूप अब थोडी देरमें पाठकोंके सामने आ जायगा।

स्वर

ह्रस्व स्वर — अ, इ, उ, ऋ, ऌ
दीर्घ स्वर — आ, ई, ऊ, ॠ [ऌ कारको दीर्घ नहीं है।]
संयुक्त स्वर — ए, ऐ, ओ, औ।
अनुस्वार — अं (ं)
विसर्ग — अः (ः)

व्यञ्जन।

कठोर व्यञ्जन - क ख। च छ। ट ठ। त थ। प फ।

मृदु व्यञ्जन - ग घ ङ। ज झ ञ। ड ढ ण। द ध न। ब भ म।
य र ल व। ह।

उष्म वर्ण - श ष स ह।

वर्णोंके ये साधारण संकेत पाठक ध्यानमें रखें, इनका उपयोग संधि करनेके समय बहुत होता है।

दो वर्ण एक दूसरेके साथ मिलनेका नाम संधि है। जैसा—

किम् अस्ति = किमस्ति
तत् अस्ति = तदस्ति
न अस्ति = नास्ति

साधारण पाठक भी इन संधियोंको थोडेसे विचारसे जान सकते हैं। थोडेसे संधि ऐसे हैं कि जो समझमें आनेके लिये कठिन होते हैं, परंतु उसके उदाहरण नीचे दिये जाते हैं।

तत् + शास्त्रं = तच्छास्त्रं
तत् + लयः = तल्लयः।
तत् + हननं = तद्धननं।

सवर्ण दीर्घ संधि।

(१) नियम पहिला।

अ, इ, उ, ऋ इनके सम्मुख क्रमशः ये ही वर्ण आ जाँय तो दोनोंके स्थानपर इनका ही दीर्घ वर्ण हो जाता है। जैसा–

अकारके सवर्ण-संधि।

अ+आ = आ	आ+अ = आ
आ+आ = आ	अ+आ = आ

इ और उ के सवर्ण-संधि।

इ+इ = ई	ई+ई = ई
उ+उ = ऊ	ऊ+ऊ = ऊ

अब इनके उदाहरण देखिये—

न+अपि	– नापि	नास्ति+इति	– नास्तीति
रमा+अपि	– रमापि	नदी+ईशः	– नदीशः
तथा+आसीत्	– तथासीत्	भानु+उदयः	– भानूदयः
न+आसीत्	– नासीत्	तनू+उद्भवः	– तनूद्भवः

ये स्वरोंके संधि स्थान स्थानपर आते हैं। इस पुस्तकमें आगे वाक्य ही दिये जायेंगे, जिनमें संधि हुए हैं। जितने श्लोक दिये हैं, उनमेंसे प्रत्येक श्लोकमें कई संधि पाठक देख सकते हैं।

(२) नियम दूसरा।

इ, उ, ऋ, ऌ के सम्मुख विजातीय स्वर आनेसे इसके स्थानपर क्रमशः य्, व्, र्, ल् हो जाते हैं।

इस नियमके उदाहरण ये हैं—

इ+अ = य	इ+आ = या
उ+अ = व	उ+आ = वा
ऋ+अ = र	ऋ+आ = रा

अब इनके संधि शब्दोंमें देखिये—

इति+आदि	– इत्यादि	आदि+अन्तः	– आद्यन्तः
नास्ति+अतः	– नास्त्यतः	कैकेयी+आत्मजः	– कैकेय्यात्मजः
भानु+अस्तः	– भान्वस्तः	पितृ+आज्ञा	– पित्राज्ञा
नदी+आत्मा	– नद्यात्मा	अति+आशा	– अत्याशा
मनु+आदि	– मन्वादि		

पाठक इन संधियोंको स्मरणमें रखें और जहां जहां दो स्वर सम्मुख आ जायँ, वहां वहां उनका संधि करनेका यत्न करें।

तथा जहां जहां संधि हुए हों, वहां वहां उन संधियोंको खोलनेका यत्न करें।

इस प्रकार अभ्यास करनेसे संधिनियमोंके साथ पाठकोंका परिचय निःसंदेह हो जायगा।

संस्कृत–वाक्यानि।

१. स तत्र नास्त्यतः त्वं तत्र न गच्छ।

२. कैकेय्यात्मजेन किं कृतम् ?

३. रामेण पित्राज्ञा पालिता।

पाठ २

संस्कृत–वाक्यानि।

१ प्रभावशालिनः महात्मनः धर्मज्ञस्य राज्ञः दशरथस्य वंशकरः सुतः नासीत्। २ पुत्रार्थं चिन्तयतः तस्य दशरथस्य "पुत्रकामेष्टिनाम्ना यज्ञेन यजामि" इति बुद्धिः सञ्जाता। ३ मन्त्रिवरं सुमन्त्रं आहूय राजा इदं अब्रवीत्। ४ सपुरोहितान् गुरून् शीघ्रं अत्र आनय। ५ आनीतान् तान् पूजयित्वा धर्मात्मा राजा इदं वचनं अब्रवीत्। ६ सुतार्थं तप्यमानस्य मम सुखं नास्ति, तदर्थं पुत्रकामेष्टिनामकः यज्ञः कर्तव्यः इति मे मतिः सञ्जाता। ७ तत् वचनं श्रुत्वा वसिष्ठप्रमुखाः सर्वे अपि द्विजाः ऋष्यशृंगं पुरस्कृत्य तं यज्ञं समारभन्। ८ तस्य यज्ञस्य अन्ते राजा दशरथः ऋष्यशृंगं अब्रवीत्। ९ 'कुलस्य वर्धनाय पुत्रकामेष्टिं कर्तुं अर्हसि।' १० स तथा इति उक्त्वा अथर्ववेदमंत्रैः पुत्रीयां इष्टिं अकरोत्। ११ तस्मात् यज्ञात् सन्तानोत्पत्तिकरः पायसः राज्ञा प्राप्तः। १२ प्रीतः राजा पायसं गृहीत्वा अन्तःपुरं प्रविश्य कौसल्यां अब्रवीत्। १३ पुत्रीयं पायसं गृहाण इति।

१४ पायसस्य अर्धभागं कौसल्यायै, चतुर्थभागं सुमित्रायै, अवशिष्टं कैकेय्यै, पुत्रार्थं प्रददौ। १५ ततः ताः राजस्त्रियः गर्भान्

प्रतिपेदिरे। १६ अनन्तरं चैत्रे मासे नवम्यां तिथौ कौसल्या रामं पुत्रं अजनयत्। १७ कैकेयी भरतं, सुमित्रा लक्ष्मणं-शत्रुघ्नं च अजनयत्। १८ एषां पुत्राणां जन्मसमये अयोध्यायां महान् उत्सवः आसीत्। १९ लक्ष्मणः रामचन्द्रस्य प्रियकरः, तथा शत्रुघ्नः भरतस्य अनुगामी अभवत्। २० यदा सर्वे पुत्राः शुभगुणैः समुदिताः सर्वज्ञाः दीर्घदर्शिनः यशस्विनः अभवन्, तदा तान् दृष्ट्वा तेषां पिता दशरथः हृष्टः आसीत्।

भाषा—वाक्य।

१ प्रभावशाली महात्मा धर्म जाननेवाले राजा दशरथको वंश बढानेवाला पुत्र नहीं था। २ पुत्रके लिये चिन्ता करनेवाले उस दशरथको 'पुत्रकामेष्टि नामक यज्ञ करूं,' ऐसी बुद्धि हुई। ३ मंत्रियोंमें श्रेष्ठ सुमन्त्र प्रधानको बुलाकर राजा यह बोला। ४ 'पुरोहितोंके साथ गुरुओंको शीघ्र यहां ला।' ५ आये हुए उनकी पूजा कर, धर्मात्मा राजा यह भाषण बोला। ६ 'पुत्रके लिये तडपनेवाले मुझे सुख नहीं, इसलिये पुत्रकामेष्टि यज्ञ करना चाहिये, ऐसी मेरी बुद्धि हो गई है।' ७ वह भाषण सुनकर वसिष्ठादि सब द्विजोंने ऋष्यशृंगको आगे करके उस यज्ञका आरंभ किया। ८ उस यज्ञके अंतमें राजा दशरथ ऋष्यशृंगसे बोला। ९ 'कुलके वर्धनके लिये पुत्रकामेष्टि करनेके लिये तू योग्य है'। १० वह (तथा) ठीक है, ऐसा कहकर अथर्ववेद-मंत्रोंसे पुत्र देनेवाली इष्टिको करने लगा। ११ उस यज्ञसे संतति करनेवाला पायस राजाने प्राप्त किया। १२ आनंदित राजा पायस लेकर अन्तःपुरमें प्रवेश कर कौसल्यासे बोला। १३ 'पुत्र देनेवाला पायस लो।'

१४ पायसका आधा भाग कौसल्याको, चौथा भाग सुमित्राको और शेष कैकेयीको पुत्रके लिये दिया। १५ उससे वे राजस्त्रियां गर्भोंको प्राप्त हो गई। १६ पश्चात् चैत्रमासमें नवमी तिथिके दिन कौसल्याने राम पुत्रको जन्म दिया। १७ कैकेयीने भरत और सुमित्राने लक्ष्मण और शत्रुघ्नको जन्म दिया। १८ इन पुत्रोंके जन्मके समय अयोध्यामें बडा उत्सव था।

१९ लक्ष्मण रामचन्द्रका प्रिय तथा शत्रुघ्न भरतका अनुगामी हुआ। २० जब पुत्र शुभगुणोंसे युक्त, सर्वज्ञ, दीर्घदर्शी और यशस्वी हो गये, तब उनको देखकर उनका पिता दशरथ (हृष्टः) संतुष्ट हुआ।

इस पाठमें रामायणकी कथा संक्षेपसे दी है। पाठसमाप्तिके पश्चात् केवल संस्कृत-वाक्य ही दस बीस वार पाठक पढें। वारंवार पढनेसे ये वाक्य पाठकोंके ध्यानमें रहेंगे।

तत्पश्चात् अपने स्मरणसे ही ये वाक्य बोलनेका यत्न कीजिये अथवा किसीसे संस्कृतमें ही कहिये। यदि पाठक ऐसा अभ्यास करेंगे, तो उनको संस्कृतका बोध अतिशीघ्र हो जायगा। रामायणकी कथाका प्रारंभ तृतीय भागसे ही हुआ है, वह पाठ भी इसके साथ ही फिर पढिये।

पाठ ३

ततोऽगच्छन्महाबाहुरेकोऽमात्यान्विसृज्य तान्।
नापश्यच्चाश्रमे तस्मिंस्तमृषिं संशितव्रतम् ॥ १ ॥
(महाभारत आदि० अ० ७१)

पदानि- ततः। आगच्छत्। महा-बाहुः। एकः। अमात्यान्। विसृज्य। तान्। न। अपश्यत्। च। आश्रमे। तस्मिन्। तं। ऋषिं। संशित-व्रतम् ॥

अन्वयः- ततः तान् अमात्यान् विसृज्य, एकः महाबाहुः अगच्छत्। तस्मिन् आश्रमे संशितव्रतं तं ऋषिं न अपश्यत् ॥

अर्थ- पश्चात् उन मंत्रियोंको छोड, अकेला (महाबाहुः) बडे बाहुवाला (दुष्यन्त) गया। उस आश्रममें संयतव्रतवाले उस ऋषिको उसने नहीं देखा।

सोऽपश्यमानस्तमृषिं शून्यं दृष्ट्वा तथाऽऽश्रमम्।
उवाच क इहेत्युच्चैर्वनं सन्नादयन्निव ॥ २ ॥

पदानि- सः। अपश्यमानः। तं। ऋषिं। शून्यं। दृष्ट्वा। तथा। आश्रमम्। उवाच। कः। इह। इति। उच्चैः। वनं। संनादयन्। इव ॥

अन्वयः— सः तं ऋषिं अपश्यमानः तथा आश्रमं शून्यं दृष्ट्वा 'कः इह' इति उच्चैः वनं संनादयन् इव, उवाच ।

अर्थ— वह उस ऋषिको न देखता हुआ, तथा आश्रमको (शून्यं) सूना पाकर, "कौन यहां है?" ऐसा ऊंचे स्वरसे, वनको प्रतिध्वनित करता हुआ, बोला ॥

श्रुत्वाऽथ तस्य तं शब्दं कन्या श्रीरिव रूपिणी ।
निश्चक्रामाश्रमात्तस्मात्तापसीवेषधारिणी ॥ ३ ॥

पदानि—श्रुत्वा । अथ । तस्य । तं । शब्दं । कन्या । श्रीः । इव । रूपिणी । निश्चक्राम । आश्रमात् । तस्मात् । तापसीवेष-धारिणी ॥

अन्वयः— अथ तस्य तं शब्दं श्रुत्वा, श्रीः इव रूपिणी तापसी-वेष-धारिणी कन्या तस्मात् आश्रमात् निश्चक्राम ।

अर्थ— अब उसका वह शब्द सुनकर लक्ष्मी जैसी सुंदर रूपवाली, तापसीका वेष धारण करनेवाली कन्या उस आश्रमसे निकल आयी ।

सा तं दृष्ट्वैव राजानं दुष्यन्तमसितेक्षणा ।
स्वागतं त इति क्षिप्रमुवाच प्रतिपूज्य च ॥ ४ ॥

पदानि— सा । तं । दृष्ट्वा+एव । राजानं । दुष्यन्तं । असित+ईक्षणा । स्वागतं । ते । इति । क्षिप्रं । उवाच । प्रतिपूज्य । च ॥

अन्वयः — सा असित-ईक्षणा तं राजानं दुष्यन्तं दृष्ट्वा एव 'स्वागतं ते' इति क्षिप्रं प्रतिपूज्य च उवाच ॥

अर्थ — वह (असित-ईक्षणा) काले नेत्रवाली कुमारिका उस राजा दुष्यन्तको देखकर ही "तेरा स्वागत है" ऐसा शीघ्र (प्रतिपूज्य) आदर करके बोली ॥

आसनेनार्चयित्वा च पाद्येनार्घ्येण चैव हि ।
पप्रच्छानामयं राजन्कुशलं च नराधिपम् ॥ ५ ॥

पदानि — आसनेन । अर्चयित्वा । च । पाद्येन । अर्घ्येण । च । एव । हि । पप्रच्छ । अनामयं । राजन् । कुशलं । च । नर-अधिपम् ॥

अन्वयः – हे राजन्! आसनेन पाद्येन अर्घ्येण च नराधिपं अर्चयित्वा अनामयं कुशलं च पप्रच्छ ॥

अर्थ – हे राजा! आसन, पाद्य और अर्घ्यसे राजाको (अर्चयित्वा) पूजकर स्वास्थ्य और कुशल पूछा ॥

यथावदर्चयित्वाऽथ पृष्ट्वा चानामयं तदा ।
उवाच स्मयमानेव किं कार्यं क्रियतामिति ॥ ६ ॥

पदानि– यथावत् । अर्चयित्वा । अथ । पृष्ट्वा । च । अनामयं । तदा । उवाच । स्मयमाना । इव । किं । कार्यं । क्रियतां । इति ॥

अन्वयः – अथ यथावत् अर्चयित्वा, तदा अनामयं पृष्ट्वा 'किं कार्यं क्रियतां' इति स्मयमाना इव उवाच ॥

अर्थ – अब (यथावत्) विधिपूर्वक पूजकर, तब (अनामयं) कुशल पूछकर, 'क्या कार्य करना?' ऐसा हास्यमुखसे पूछा ।

तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम् ।
दृष्ट्वा चैवानवद्याङ्गीं यथावत्प्रतिपूजितः ॥ ७ ॥

पदानि– तां । अब्रवीत् । ततः । राजा । कन्यां । मधुरभाषिणीं । दृष्ट्वा । च । एव । अनवद्य-अङ्गीं । यथावत् । प्रति-पूजितः ॥

अन्वयः – ततः यथावत् प्रतिपूजितः राजा तां मधुरभाषिणीं अनवद्याङ्गीं कन्यां दृष्ट्वा एव अब्रवीत् ॥

अर्थ – पश्चात् यथायोग्य पूजा पाकर राजा उस मधुरभाषिणी अनिंदित अंगवाली कन्याको देखकर ही बोला ।

यह पाठ समाप्त करते ही पाठक केवल श्लोक ही श्लोक पुनः पुनः पढें । शनैः शनैः ऐसे स्वरसे पढें कि पढते ही उनके मनमें अर्थ आजाय और अर्थके विषयमें कोई संदेह न रहे ।

तथा श्लोकके पद कैसे बनते हैं, पदोंसे अन्वय किस रीतिसे होता है, यह सब ध्यानपूर्वक देखते रहें । इस अभ्याससे शीघ्र ही संस्कृतमें प्रगति होती है ।

पाठ ४

पूर्वपाठमें दिया हुआ रामायणका भाग संधि बनाकर यहां दिया जाता है। पढनेसे पाठकोंको स्वयं पता लग जायगा कि संधि कैसे होते हैं और उनको खोलकर पद कैसे बनाने चाहिये। देखिये—

रामायण कथा।

प्रभावशालिनो महात्मनो धर्मज्ञस्य राज्ञो दशरथस्य वंशकरः सुतो नासीत्। पुत्रार्थं चिन्तयतस्तस्य दशरथस्य पुत्रकामेष्टिनाम्ना यज्ञेन यजामीति बुद्धिस्सञ्जाता। मंत्रिवरं सुमंत्रमाहूय राजेदमब्रवीत्। सपुरोहितान्गुरूञ्छीघ्रमत्रानय। आनीतांस्तान् पूजयित्वा धर्मात्मा राजेदं वचनमब्रवीत्। सुतार्थं तप्यमानस्य मम सुखं नास्ति! तदर्थं पुत्रकामेष्टिनामको यज्ञः कर्तव्य इति मे मतिः सञ्जाता। तद्वचनं श्रुत्वा वसिष्ठप्रमुखाः सर्वेऽपि द्विजा ऋष्यशृङ्गं पुरस्कृत्य तं यज्ञं समारभन्। तस्य यज्ञस्यान्ते राजा दशरथ ऋष्यशृंगमब्रवीत्। कुलस्य वर्धनाय पुत्रकामेष्टिं कर्तुमर्हसि। स तथेत्युक्त्वाऽथर्ववेदमंत्रैः पुत्रीयामिष्टिमकरोत्। तस्माद्यज्ञात्सन्तानोत्पत्तिकरः पायसो राज्ञा प्राप्तः। प्रीतो राजा पायसं गृहीत्वाऽन्तःपुरं प्रविश्य कौसल्यामब्रवीत्। पुत्रीयं पायसं गृहाणेति। पायसस्यार्धभागं कौसल्यायै, चतुर्थभागं सुमित्रायै, अवशिष्टं कैकेय्यै पुत्रार्थं प्रददौ। ततस्ता राजस्त्रियो गर्भान्प्रतिपेदिरे। अनन्तरं चैत्रे मासे नवम्यां तिथौ कौसल्या रामं पुत्रमजनयत्। कैकेयी भरतं, सुमित्रा लक्ष्मणं, शत्रुघ्नं चाजनयत्। एषां पुत्राणां जन्मसमये अयोध्यायां महानुत्सव आसीत्। लक्ष्मणो रामस्य प्रियकरस्तथा शत्रुघ्नो भरतस्यानुगाम्यभवत्। यदा सर्वे पुत्राः शुभगुणैः समुदिता सर्वज्ञा दीर्घदर्शिनो यशस्विनोऽभवस्तदा तान्दृष्ट्वा तेषां पिता दशरथो हृष्ट आसीत्।

सूचना ।

पाठक यह सरल संस्कृत बारबार पढें और समझनेका यत्न करें । किसी स्थानपर यदि ठीक समझमें न आया, तो समझनेका प्रयत्न करें । न समझनेपर पूर्व पाठमें यह वाक्य देखें । ऐसा प्रयत्न करनेसे संस्कृतके संधियोंके साथ पाठकोंका परिचय होगा । विना आयास संधि करने और संधि खोलनेका अभ्यास इसी प्रकार होता जायगा । संस्कृतमें संधियोंका सर्वत्र महत्त्व है । इसलिये संधिप्रकरणका अभ्यास सुगम रीतिसे करनेका यही उपाय है ।

अब श्लोकोंका सरल संस्कृत नीचे दिया जाता है । पूर्व पाठके श्लोकोंका सरल संस्कृत यह है । इसमें किसी स्थानपर यदि कोई कठिनता उत्पन्न हो गई तो पूर्व पाठमें देखनेसे वह दूर होगी ।

संस्कृत पाठः ।

ततस्तानमात्यान्विसृज्यैको महाबाहुरगच्छत् । तस्मिन्नाश्रमे संशितव्रतं तमृषिं नापश्यत् । स तमृषिमपश्यमानस्तथाऽऽश्रमं शून्यं दृष्ट्वा " क इह " इत्युच्चैर्वनं सन्नादयन्निवोवाच । अथ तस्य तं शब्दं श्रुत्वा श्रीरिव रूपिणी तापसी वेषधारिणी कन्या तस्मादाश्रमान्निश्चक्राम । साऽसितेक्षणा तं राजानं दुष्यन्तं दृष्ट्वैव " स्वागतं ते " इति क्षिप्रं प्रतिपूज्य चोवाच—

हे राजन् ! आसनेन पाद्येनार्घ्येण चैव हि नराधिपमर्चयित्वाऽनामयं कुशलं च पप्रच्छ । अथ यथावदर्चयित्वा, तदाऽनामयं पृष्ट्वा च, ' किं कार्यं क्रियतां ' इति स्मयमानेवोवाच ।

ततो यथावत्प्रतिपूजितो राजा तां मधुरभाषिणीमनवद्याङ्गीं कन्यां दृष्ट्वैवाब्रवीत् ।

सूचना ।

पूर्व पाठके श्लोकोंका सरल संस्कृत यह है । पाठक इसको पढें और समझनेका यत्न करें । जहां समझनेमें कठिनता हो, वहां पूर्व श्लोकोंके अन्वयमें देखकर शंकाकी निवृत्ति करें ॥

अब उक्त वाक्योंके ही शब्दोंका हेरफेर करके वाक्य बनाकर नीचे दिये जाते हैं। इन वाक्योंमें कुछ शब्द अधिक भी हैं, कुछ कम भी किये हैं और शब्दोंके स्थान भी बदल दिये हैं।

संस्कृत पाठः ।

अनन्तरममात्यान्दूरतो विसृज्य दुष्यन्तो राजा कण्वस्याश्रमम-गच्छत्। परं तस्मिन्नाश्रमे स राजा कण्वं मुनिं नापश्यत्। तं मुनिमपश्यमानः स राजा 'क इहास्ति।' इत्युच्चैर्वनं संनादयन्निवोवाच।

तस्य शब्दं श्रुत्वा तापसी कन्या तस्मादाश्रमान्निश्चक्राम। सा कन्या तं राजानं ज्ञात्वा "स्वागतं त" इति संपूज्य चोवाच। आसनेन पाद्येनार्घ्येण च तं नृपतिमर्चयित्वा कुशलं च पृष्ट्वा "किं कार्यं कर्तव्यम्" इति स्मयमानोवाच। तथा पूजितो राजा मधुर-भाषिणीं तां कन्यामिदमब्रवीत्।

सूचना ।

पाठक पूर्ववत् इसको भी समझनेका यत्न करें। इसमें जो शब्दोंकी न्यूनाधिकता है, वह थोडेसे प्रयत्नसे पाठक समझ सकते हैं। इसी प्रकार यदि पाठक अपने मनसे वाक्य बनाते जायेंगे, तो उनको बडा ही लाभ हो सकता है।

अब संधिके नियम बताये जाते हैं।

(३) तृतीय नियम ।

ए ऐ ओ औ इन स्वरोंके सम्मुख अन्य स्वर आनेसे उनके स्थानपर क्रमशः अय्, आय्, अव्, आव् होते हैं। उदाहरण—

ए+अ	= अय	ओ+अ	= अव
ऐ+आ	= आय	औ+आ	= आव
हरे+ए	= हरये	विष्णो+ए	= विष्णवे
नै+अकः	= नायकः	पौ+अकः	= पावकः

(४) चतुर्थ नियम ।

अ वर्णके सम्मुख इ उ ये स्वर आनेसे दोनोंके मिलकर क्रमशः ए और ओ होते हैं—

भय+उत्पादक	= भयोत्पादक
गंगा+उदकं	= गंगोदकं
जल+ईशः	= जलेशः
गंगा+ईशः	= गंगेशः

पाठ ५

(५) पञ्चम नियम ।

पदान्तके अन्तिम ए अथवा ओ के परे अकार आनेसे उस अकारका लोप हो जाता है, अर्थात् यह अकार पूर्वाक्षरमें मिल जाता है।

जहां जहां अकार इस प्रकार मिल जाता है, वहां ऽ यह चिह्न लिखते हैं। जैसे—

जले अन्तर्हितः = जलेऽन्तर्हितः ।
रामो अब्रवीत् = रामोऽब्रवीत् ।

(६) षष्ठ नियम ।

अकारके पश्चात्के विसर्गके सम्मुख पुनः अकार अथवा मृदु व्यञ्जन आनेसे उस विसर्गका ओ बनता है। और इसमें आगेका अकार मिल जाता है। जैसा—

रामः + अब्रवीत्	= रामोऽब्रवीत् ।
जनः + अस्ति	= जनोऽस्ति ।
मनुष्यः + गच्छति	= मनुष्यो गच्छति ।
अश्वः + मृतः	= अश्वो मृतः ।

(७) सप्तम नियम ।

इ अथवा उ के पश्चात्‌के विसर्गके सम्मुख स्वर अथवा मृदु व्यञ्जन आनेसे विसर्गका रकार (रेफ) बनता है। जैसे—

हरिः+अस्ति = हरिरस्ति ।
गुरुः+अब्रवीत् = गुरुरब्रवीत् ।
भानुः+गच्छति = भानुर्गच्छति ।
कविः+जानाति = कविर्जानाति ।

मृदु व्यञ्जन न होनेसे विसर्गका रेफ नहीं होता, इसके भी उदाहरण देखिये—

हरिः करोति = हरिः करोति । गुरुः पुनाति । गुरुः पुनाति ।

इसमें विसर्गके सम्मुख कठोर व्यञ्जन होनेसे विसर्ग जैसाका वैसा ही रह गया है ।

(८) अष्टम नियम ।

विसर्गके सम्मुख च, छ आनेसे विसर्गका श् बनता है—

रामः+चलति = रामश्चलति ।
जनः+छेदयति = जनश्छेदयति ।

(९) नवम नियम ।

विसर्गके सम्मुख त अथवा थ वर्ण आनेसे विसर्गका स् बनता है। जैसा—

माधवः+तथा = माधवस्तथा ।
रामः+थूर्वति = रामस्थूर्वति ।

(१०) दशम नियम ।

विसर्गके सम्मुख ट अथवा ठ आनेसे विसर्गका ष् बनता है ।

कृष्णः+टीकते = कृष्णष्टीकते ।

(११) एकादश नियम ।

विसर्गके सम्मुख श, ष, स, ये अक्षर आनेसे विसर्गके क्रमसे श्, ष्, स् बनते हैं अथवा विसर्ग ही कायम रहता है ।

रामः+शास्ति = रामश्शास्ति, रामः शास्ति ।
जनः+ष्ठीवति = जनष्ष्ठीवति, जनः ष्ठीवति ।
नरः+सहते = नरस्सहते, नरः सहते ।

पाठक ये नियम अपने पाठोंमें देखें और किसी नियमके अनुकूल कौनसा संधि कहां हुआ है, यह जाननेका यत्न करें ।

यह कार्य बडा सुगम है। यदि पाठक ध्यानपूर्वक संधिके स्थानपर देखेंगे, और ध्यानसे सोचेंगे, तो इसमें कोई कठिनता उनको प्रतीत नहीं होगी ।

संधि किये हुए वाक्य ।

महाबाहुर्दुष्यन्तो राजा तदा तत्रागच्छत्। दुष्यन्तो नाम महाबाहू राजा तदाऽगच्छत्तत्र । महाबाहू राजा दुष्यन्तो नामागच्छत्तत्र तदा । अगच्छत्तदा तत्र दुष्यन्तो नाम महाबाहू राजा ।

तत्र स राजा संशितव्रतं कण्वं नाम महर्षिं तत्राश्रमे नापश्यत्। नापश्यत्तत्राश्रमे स राजा कण्वं नाम संशितव्रतं महर्षिम् ।

ततो राजा तां मधुरभाषिणीं कन्यामब्रवीत्। राजा ततस्तां मधुरभाषिणीं कन्यामब्रवीत्।राजा ततो मधुरभाषिणीं तां कन्यामब्रवीत् । ततो मधुरभाषिणीं तां कन्यां राजाऽब्रवीत् । अब्रवीद्राजा ततस्तां मधुरभाषिणीं कन्याम् । मधुरभाषिणीं तां कन्यां ततो राजाऽब्रवीत्।

पाठ ६

रामायण कथा ।

१ अथ राजा दशरथः तेषां पुत्राणां दारक्रियां चिन्तयामास । २ तदा तत्र महामुनिः विश्वामित्रः अभ्यागच्छत् । ३ हृष्टमनाः राजा तं मुनिं अभिपूजयन् उवाच । ४ 'महामुने ! त्वया अनुगृहीतः अस्मि । ५ यत् भवतां कार्यं अस्ति, तत् अशेषेण एव करिष्यामि । ६ भवान् हि दैवतं मम । ७ तदा आनंदितः विश्वामित्रः अभ्यभाषत । ८ अहं एकं क्रतुं कर्तुं इच्छामि, तस्य रक्षणार्थं ज्येष्ठं स्वपुत्रं रामं दातुं अर्हसि । ९ मम यज्ञस्य विघ्नकर्तारौ मारीचसुबाहू नाम राक्षसौ स्तः । १० 'तव पुत्रः हि दिव्येन स्वेन तेजसा राक्षसानां विनाशने समर्थः अस्ति । ११ यज्ञस्य रक्षणार्थं केवलं दशरात्रं एव कमललोचनं रामं दातुं अर्हसि । १२ अहं रामाय च बहुविधं श्रेयः दास्यामि ।' १३ एतत् मुनेः वचनं श्रुत्वा राजा निःसंज्ञः अभवत् । १४ 'मे रामः ऊनषोडशवर्षः, राक्षसानां न योग्यः । १५ राक्षसाः कूटयुद्धाः भवन्ति । १६ अहं तु रामेण वियुक्तः मुहूर्तं अपि जीवितुं न उत्सहे । १७ कालोपमौ मारीचसुबाहू । १८ तन्न दास्यामि पुत्रकम् ।' १९ राज्ञः इदं वचनं श्रुत्वा क्रुद्धः विश्वामित्रः प्रत्युवाच । २० 'हे राजन् ! स्वकीयां प्रतिज्ञां हातुं इच्छसि, अयुक्तं एतत् रघुकुलस्य । २१ गच्छामि अहं विमुखः ।' २२ तदा ऋषिणा वसिष्ठेन अपि मन्त्रितः राजा दशरथः सलक्ष्मणं रामं कौशिकाय विश्वामित्राय ददौ । २३ तदा रामलक्ष्मणौ धनुष्पाणी विश्वामित्रं अनुजग्मतुः ।

भाषा—वाक्य ।

१ अब राजा दशरथ उन पुत्रोंकी (दारक्रिया) शादीके विषयमें सोचने लगा । २ तब वहां महामुनि विश्वामित्र आगये । ३ संतुष्ट राजा उस मुनिको

पूजा करके बोला । ४ 'हे महामुने ! तेरे कारण मैं अनुगृहीत हुआ हूं । ५ जो आपका कार्य है वह पूर्णतासे ही करूंगा । ६ क्योंकि (भवान्) आप मेरा दैवत हैं।' ७ उस समय आनंदित विश्वामित्र बोलने लगा। ८ 'मैं एक यज्ञ करना चाहता हूं, उसके रक्षणके लिये अपने ज्येष्ठ पुत्र रामको देनेके लिये योग्य है। ९ मेरे यज्ञके विघ्नकर्ता मारीच और सुबाहु नामक राक्षस हैं।' १० 'तेरा पुत्र अपने दिव्य तेजसे राक्षसोंका नाश करनेमें समर्थ है। ११ यज्ञकी रक्षाके लिये केवल दस रात्रितक ही कमल-नेत्र रामको देनेके लिये तू योग्य है । १२ मैं रामके लिये अनेक प्रकारका कल्याण दूंगा।' १३ यह मुनिका वचन सुनकर राजा मूर्छित हुआ । १४ 'मेरा राम सोलह वर्षोंसे कम आयुवाला है, राक्षसोंके लिये योग्य नहीं है। १५ राक्षस कपटयुद्ध करनेवाले होते हैं। १६ मैं तो रामसे विरहित घडीभर भी जीवित रहनेके लिये उत्साहित नहीं हूं। १७ कालके समान मारीच और सुबाहु हैं। १८ इसलिये नहीं दूंगा पुत्रको।' १९ राजाका यह वचन सुनकर क्रोधित विश्वामित्र बोला। २० 'हे राजा! अपनी प्रतिज्ञाका त्याग करना चाहता है, यह रघुकुलके लिये योग्य नहीं है । २१ जाता हूं मैं विमुख होकर।' २२ तब ऋषि वसिष्ठकी मंत्रणासे राजा दशरथने लक्ष्मणसहित रामको कुशिकवंशज विश्वामित्रको दिया। २३ तब राम और लक्ष्मण हाथमें धनुष्य लेते हुए विश्वामित्रके पीछे चले।

रामायणका पहिला पाठ तृतीय पुस्तकमें है और इस पुस्तकमें दो पाठ हैं। सब मिलकर तीन पाठ आपने इस समयतक पढे हैं।

कृपया आजके दिन उक्त तीनों पाठ पुनः पढिये और ऐसा यत्न कीजिये कि संस्कृतमें ही सब कथा आप विना पुस्तक देखे कह सकें। यदि आप बहुतसी कथा विना देखे कह सकें, तो समझिये कि आपकी प्रगति बहुत हो चुकी है।

संधि किये हुए वाक्य।

प्रभावशालिनो महात्मनो धर्मज्ञस्य राज्ञो दशरथस्य वंशकरः सुतो नासीत्। पुत्रार्थं चिन्तयमानस्य तस्य दशरथस्य "पुत्रका-

मेष्टिनाम्ना यज्ञेन यजामीति" बुद्धिस्सञ्जाता। मन्त्रिवरं सुमन्त्र-माहूय राजेदमब्रवीत्। सपुरोहितान्गुरूञ्छीघ्रमत्रानय। आनीतां-स्तान्पूजयित्वा धर्मात्मा राजेदं वचनमब्रवीत्। सुतार्थं तप्यमान-स्य मम सुखं नास्ति, तदर्थं पुत्रकामेष्टिनामको यज्ञः कर्तव्य इति मे मतिः सञ्जाता।

पाठ ७

आगतोऽहं महाभागमृषिं कण्वमुपासितुम्।
क्व गतो भगवान्भद्रे तन्ममाचक्ष्व शोभने ॥ ८ ॥
(म० भारत आदि० ७१)

पदानि- आगतः। अहं। महाभागं। ऋषिं। कण्वं। उपासितुं। क्व। गतः। भगवान्। भद्रे। तत्। मम। आचक्ष्व। शोभने ॥

अन्वयः- महाभागं कण्वं ऋषिं उपासितुं अहं आगतः। हे भद्रे शोभने! भगवान् क्व गतः? तत् मम आचक्ष्व ॥

अर्थ- महाभाग्यवान् कण्व ऋषिको (उपासितुं) मिलनेके लिये मैं आ गया हूं। हे भद्रे शोभने! भगवान् कहां गये हैं? वह मुझे कहो।

शकुन्तलोवाच।

गतः पिता मे भगवान्फलान्याहर्तुमाश्रमात्।
मुहूर्तं संप्रतीक्षस्व द्रष्टास्येनमुपागतम् ॥ ९ ॥

पदानि - शकुन्तला। उवाच। गतः। पिता। मे। भगवान्। फलानि। आहर्तुं। आश्रमात्। मुहूर्तं। संप्रतीक्षस्व। द्रष्टा। असि। एनं। उपागतम् ॥

अन्वयः- शकुंतला उवाच- मे भगवान् पिता फलानि आहर्तुं आश्रमात् गतः। मुहूर्तं संप्रतीक्षस्व। एनं उपागतं द्रष्टासि।

अर्थ - मेरे भगवान् पिता फल बटोरनेको आश्रमसे निकले हैं। आप घडीभर ठहरिये। उनको लौटे हुए देखेंगे।

*

वैशम्पायन उवाच ।

अपश्यमानस्तमृषिं तथा चोक्तस्तया च सः ।
तां दृष्ट्वा च वरारोहां श्रीमतीं चारुहासिनीम् ॥ १० ॥

पदानि—अपश्यमानः । तं । ऋषिं । तथा । च । उक्तः । तया । च । सः । तां । दृष्ट्वा । च । वरारोहां । श्रीमतीं । चारु-हासिनीम् ॥

अन्वयः – तं ऋषिं अपश्यमानः, तया च तथा उक्तः सः तां वरारोहां श्रीमतीं चारुहासिनीं दृष्ट्वा ॥

अर्थ– उस ऋषिको न देखकर, तथा उससे (उक्तः) सुनकर, वह उस (वरारोहां) सुन्दर, श्रीमती, सुंदर हंसनेवालीको देखकर [बोला] ॥

विभ्राजमानां वपुषा तपसा च दमेन च ।
रूपयौवनसंपन्नामित्युवाच महीपतिः ॥ ११ ॥

पदानि – विभ्राजमानां । वपुषा । तपसा । च । दमेन । च । रूप-यौवन-संपन्नां । इति । उवाच । महीपतिः ॥

अन्वयः– वपुषा तपसा दमेन च विभ्राजमानां रूपयौवनसंपन्नां महीपतिः इति उवाच ॥

अर्थ – (वपुषा) शरीरसे, (तपसा) तपसे तथा संयमसे (वि) विशेष (भ्राजमानां) तेजस्वी और (रूप) सुरूपता तथा (यौवन) तारुण्यसे (संपन्नां) युक्त कुमारिकाको (महीपतिः) राजा यह बोला ॥

का त्वं कस्यासि सुश्रोणि किमर्थं चागता वनम् ॥
एवं रूपगुणोपेता कुतस्त्वमसि शोभने ॥ १२ ॥

पदानि– का । त्वं । कस्य । असि । सुश्रोणि । किं-अर्थं । च । आगता । वनम् । एवं । रूप-गुण-उपेता । कुतः । त्वं । असि । शोभने ॥

अन्वयः – हे सुश्रोणि ! त्वं का ? कस्य असि ? हे शोभने ! एवं रूप-गुणोपेता त्वं वनं किमर्थं कुतः आगता असि ?

अर्थ – हे उत्तम श्रोणीवाली ! तू कौन ? किसकी हो ? हे सुंदरी ! तुम

प्रकार रूप और गुणोंसे युक्त होकर तू वनको किस कारण और कहांसे आ गई है ?

दर्शनादेव हि शुभे त्वया मेऽपहृतं मनः।
इच्छामि त्वामहं ज्ञातुं तन्ममाचक्ष्व शोभने ॥ १३ ॥

पदानि – दर्शनात्। एव। हि। शुभे। त्वया। मे। अपहृतं। मनः। इच्छामि। त्वां। अहं। ज्ञातुं। तत्। मम। आचक्ष्व। शोभने ॥

अन्वयः– हे शुभे! दर्शनात् एव हि मे मनः त्वया अपहृतं। हे शोभने! अहं त्वां ज्ञातुं इच्छामि, तत् मम आचक्ष्व ॥

अर्थ – हे सुंदरी! दर्शनसे ही मेरा मन तुमने हर लिया है। हे सुंदरी मैं तुझे जानना चाहता हूं, वह मुझे कहो।

एवमुक्ता तु सा कन्या तेन राज्ञा तमाश्रमे।
उवाच हसती वाक्यमिदं सुमधुराक्षरम् ॥ १४ ॥

पदानि– एवम्। उक्ता। तु। सा। कन्या। तेन। राज्ञा। तम्। आश्रमे। उवाच। हसती। वाक्यम्। इदम्। सु-मधुर-अक्षरम् ॥

अन्वयः – तेन राज्ञा तु सा कन्या आश्रमे एवं उक्ता, हसती इदं सुमधुराक्षरं वाक्यं उवाच ॥

अर्थ – उस राजाने वह कन्या आश्रममें इस प्रकार कही जानेपर, हंसती हुई यह उत्तम मधुर अक्षरयुक्त वाक्य बोली ॥

सूचना।

इस अंतिम श्लोकके पद दिये नहीं हैं। पाठक अन्वयके अनुसंधानसे पद जाननेका यत्न करें। यह अत्यंत सुगम है।

पाठ समाप्त होते ही पाठक श्लोकोंको वारंवार पढें और केवल श्लोक पढते ही उनका अर्थ ध्यानमें आनेयोग्य अपना अभ्यास बढावें। यदि श्लोक शांतिसे पढे जायेंगे, तो उसी क्षण उनका अर्थ ध्यानमें आ सकता है।

इतनी तैयारी होनेपर बिना पुस्तक श्लोकका भावार्थ अपनी संस्कृतमें कागजपर लिखना और अन्वयके साथ मिलाना। अर्थात् अपनी प्रगति कितनी हुई है यह समझमें आजायगा और क्रमिक संस्कृत वाक्य बनानेका अभ्यास बढेगा।

संधि किये हुए वाक्य।

मे भगवान् पिता कण्वः फलान्याहर्तुमाश्रमाद्गतः। कण्वो मे भगवान्पिता फलान्याहर्तुमाश्रमाद्गतः। आश्रमाद्गतो मे पिता भगवान्कण्वः फलान्याहर्तुम्।

तं राजानं सुमधुराक्षरमिदं वाक्यमुवाच। सुमधुराक्षरमिदं वाक्यं तं राजानमुवाच। उवाच तं राजानमिदं सुमधुराक्षरं वाक्यम्।

पाठ ८

पूर्व दो पाठोंमें आये हुए संस्कृत–वाक्योंका संधियुक्त सरल संस्कृत नीचे दिया है। पूर्ववत् इसका भी पाठक अच्छा अभ्यास करें।

रामायण कथा

अथ राजा दशरथस्तेषां पुत्राणां दारक्रियां चिन्तयामास। तदा तत्र महामुनिर्विश्वामित्रोऽभ्यागच्छत्। हृष्टमना राजा तं मुनिमभिपूजयन्नुवाच। महामुने! त्वयाऽनुगृहीतोऽस्मि। यद्भवतां कार्यमस्ति तदशेषेणैव करिष्यामि। भवान्हि दैवतं मम।

तदाऽऽनन्दितो विश्वामित्रोऽभ्यभाषत। अहमेकं क्रतुं कर्तुमिच्छामि। तस्य रक्षणार्थं ज्येष्ठं स्वपुत्रं रामं दातुमर्हसि। मम यज्ञस्य विघ्नकर्तारौ मारीचसुबाहू नाम राक्षसौ स्तः। तव पुत्रो हि दिव्येन स्वेन तेजसा राक्षसानां विनाशने समर्थोऽस्ति। यज्ञस्य

रक्षणार्थं केवलं दशरात्रमेव कमललोचनं रामं दातुमर्हसि । अहं रामाय च बहुविधं श्रेयो दास्यामि । एतन्मुनेर्वचनं श्रुत्वा राजा निःसंज्ञोऽभवत् ।

मे राम ऊनषोडशवर्षो राक्षसानां न योग्यः । राक्षसाः कूटयुद्धा भवन्ति । अहं तु रामेण वियुक्तो मुहूर्तमपि जीवितुं नोत्सहे । कालोपमौ मारीचसुबाहू । तन्न दास्यामि पुत्रकम् ।

राज्ञ इदं वचनं श्रुत्वा क्रुद्धो विश्वामित्रः प्रत्युवाच । हे राजन् ! स्वकीयां प्रतिज्ञां हातुमिच्छसि ? अयुक्तमेतद्रघुकुलस्य । गच्छाम्यहं विमुखः ।

तदार्षिणा वसिष्ठेनापि मन्त्रितो राजा दशरथो रामं सलक्ष्मणं कौशिकाय विश्वामित्राय ददौ । तदा रामलक्ष्मणौ धनुष्पाणी विश्वामित्रमनुजग्मतुः ॥

सूचना ।

पाठक इस पाठको वारंवार पढें और समझनेका यत्न करें । किसी स्थानका संधि समझमें न आया, तो पूर्व पाठके वाक्य देखकर अपनी कठिनता दूर करें । जिनका पूर्वपाठ ठीक हुआ होगा उनके लिये इसमें कोई कठिनता नहीं होगी । अब पूर्व पाठके श्लोकोंका सरल संस्कृत यहां दिया जाता है । इसका भी पूर्ववत् ही अभ्यास पाठक करें ।

शकुन्तलाख्यानम् ।

महाभागं कण्वमृषिमुपासितुमहमागतः । हे भद्रे शोभने ! भगवान्क्व गतः ? तन्ममाचक्ष्व । शकुन्तलोवाच-मे भगवान्पिता फलान्याहर्तुमाश्रमाद्गतः । मुहूर्तं संप्रतीक्षस्व । एनमुपागतं द्रष्टासि ।

तमृषिमपश्यमानस्तया च तथोक्तः स तां वरारोहां श्रीमतीं चारुहासिनीं दृष्ट्वा वपुषा तपसा दमेन च विभ्राजमानां रूपयौवनसंपन्नां महामतिरित्युवाच ।

हे सुश्रोणि ! का त्वं ? कस्यासि ? हे शोभने ! एवं रूपगुणोपेता त्वं वनं किमर्थं कुत आगतासि ? हे शुभे ! दर्शनादेव हि मे मनः त्वयाऽपहृतम् । हे शोभने ! अहं त्वां ज्ञातुमिच्छामि । तन्ममाचक्ष्व ।

तेन राज्ञा तु सा कन्याऽऽश्रम एवमुक्ता हसतीदं सुमधुराक्षरं वाक्यमुवाच ॥

सूचना ।

पूर्वोक्त श्लोकोंका सरल संस्कृत यह है । यदि पाठकोंका पूर्व पाठ ठीक हुआ है तो यह बिना परिश्रम समझमें आजायगा । संधिके कारण यदि किसी स्थानपर कोई कठिनता उत्पन्न हुई, तो वह पूर्व पाठ देखनेसे उसी समय निवृत्त हो सकती है ।

अब कुछ अन्य वाक्य दिये जाते हैं । इनको भी पूर्ववत् ही पढिये ।

संस्कृत–वाचन–पाठः ।

१ शिवाय शान्ताय निश्चलाय यशस्विने जगद्बीजाय श्रेष्ठाय तस्मै वीर्यात्मने परमेश्वराय नमः । २ सर्वे अपि सुखिनः सन्तु । सर्वे निरामयाः सन्तु । सर्वे भद्राणि पश्यन्तु । न कश्चिद् दुःखं आप्नुयात् । ३ सर्वदा सत्यं भाषणं एव श्रेयस्करं भवति । सः मनुष्यः सर्वदा सत्यं भाषणं एव वदति । ४ महामुनिः विश्वामित्रः दशरथं राजानं किं अवदत् ? विश्वामित्रः दशरथं प्रति किमर्थं आगतः ? ५ राज्ञा दशरथेन विश्वामित्रं प्रति किं उक्तम् ? तस्य दशरथस्य भाषणेन विश्वामित्रः संतुष्टः वा न ? ६ कः विश्वामित्रस्य यज्ञस्य विघ्नकर्ता आसीत् ? केन यज्ञस्य रक्षणं कृतम् ?

सूचना ।

पाठक इस पाठका अभ्यास करनेके पश्चात् यदि हो सके तो इनके संधि करनेका यत्न करें । यह कोई आवश्यकता नहीं है कि अवश्य ही संधि इस

समय ठीक होने चाहिये। परन्तु पाठक यत्न करके देखें। कोई अशुद्धि भी हुई तो हानि नहीं है।

सर्वे अपि= सर्वेऽपि। सः मनुष्यः= स मनुष्यः। सत्यं एव= सत्यमेव। महामुनिः विश्वामित्रः= महामुनिर्विश्वामित्रः। विश्वामित्रः दशरथं= विश्वामित्रो दशरथं। किं अवदत्= किमवदत्। संतुष्टः वा= संतुष्टो वा। कः विश्वामित्रः= को विश्वामित्रः। विघ्नकर्ता आसीत्= विघ्नकर्तासीत्।

संधि किये हुए वाक्य।

१ सर्वदा सत्यं भाषणमेव श्रेयस्करं भवति। भवति सर्वदा सत्यमेव भाषणं श्रेयस्करम्। श्रेयस्करं भवति सर्वदा सत्यमेव भाषणम्। सत्यमेव भाषणं सर्वदा भवति श्रेयस्करम्।

२ महामुनिर्विश्वामित्रो दशरथं राजानं किमवदत्? किमवदन्महामुनिर्विश्वामित्रो राजानं दशरथम्?

पाठ ९

इस पाठमें और संधिनियम बताये जाते हैं—

(१२) द्वादश नियम

क्, च्, ट्, त्, प् के सम्मुख स्वर अथवा मृदु व्यञ्जन आनेसे क्रमशः ग्, ज्, ड्, द्, ब् होते हैं जैसा—

वाक्+गणः = वाग्गणः।
अच्+अन्तः = अजन्तः।
विश्ववाट्+उत्तरः = विश्ववाडुत्तरः।
तत्+अस्ति = तदस्ति।
अप्+जम् = अब्जम्।

(१३) त्रयोदश नियम।

क, च, ट, त, प इन वर्णोंके सम्मुख ङ, ञ, ण, न, म आनेसे पूर्व वर्णोंके भी क्रमशः ङ्, ञ्, ण्, न्, म् ही होते हैं ।

वाक्+मनः = वाङ्मनः ।
वाक्+नमनं = वाङ्नमनं ।
सम्राट्+मुखं = सम्राण्मुखं ।
तत्+नास्ति = तन्नास्ति ।
अप्+मयं = अम्मयं ।

(१४) चतुर्दश नियम ।

त्, थ्, द्, ध्, न् के सम्मुख ल आनेसे पूर्व वर्णका भी ल हो जाता है, जैसा—

जगत्+लयः = जगल्लयः ।
अस्मद्+लाभः = अस्मल्लाभः ।
जनान्+लभते = जनाँल्लभते ।

न अनुनासिक होनेसे लकारके पूर्व अनुनासिक हुआ है । नासिकासे उच्चार जिसका होता है, उसको अनुनासिक कहते हैं । ङ, ञ, ण, न, म ये अनुनासिक हैं ।

(१५) पञ्चदश नियम।

रेफके सम्मुख रकार आनेसे पूर्व रकारका लोप होता है और उसके पूर्वका स्वर दीर्घ होता है । जैसा—

पुनः+रमते = पुनर्+रमते = पुना रमते ।
हरिः+रथस्य = हरिर्+रथस्य = हरी रथस्य ।

विसर्गका रेफ हुआ, उसका लोप हो गया और पूर्व स्वर दीर्घ हुआ ।

(१६) षोडश नियम ।

स-कार तथा त-वर्गके सम्मुख श-कार तथा च-वर्ग आनेसे पूर्व वर्णके शकार तथा चवर्ग होते हैं—

चवर्ग— च, छ, ज, झ, ञ ।

इसके उदाहरण ये हैं।

हरिः+शेते = हरिस्+शेते = हरिश्शेते।
रामः+चलति = रामस्+चलति = रामश्चलति।
सत्+चित् = सच्चित्।
शार्ङ्गिन्+जय = शार्ङ्गिञ्जय।

यहां वर्गकी संज्ञा पाठकोंके समझमें आनेके लिये नीचे वर्ग दिये जाते हैं—

क वर्ग - क ख ग घ ङ
च वर्ग - च छ ज झ ञ
ट वर्ग - ट ठ ड ढ ण
त वर्ग - त थ द ध न
प वर्ग - प फ ब भ म

इनमें प्रत्येक वर्गमें अन्तिम वर्ण अनुनासिक है। अनुनासिक= ङ, ञ, ण, न, म।

(१७) सप्तदश नियम।

स-कार और त-वर्गके सम्मुख षकार तथा ट-वर्ग आनेसे पूर्व वर्णके ष-कार और ट-वर्ग होते हैं।

रामः+षष्ठः = रामस्+षष्ठः = रामष्षष्ठ।
रामः+टीकते = रामस्+टीकते+रामष्टीकते।
तत्+टीका = तट्टीका।

पाठक इतने नियम ध्यानमें धरेंगे तो आवश्यक संधिविषयक ज्ञान उनको हो सकता है।

इस समय यह कोई आवश्यक नहीं है कि सब संधि ठीक ही आजायँ। जैसी जैसी भाषामें उनकी प्रगति होती जायगी, वैसा संधियोंका ज्ञान स्वयं होता जायगा।

यद्यपि यह प्रारंभमें कठिनसा प्रतीत होता है, तथापि अभ्याससे यह अत्यंत सुगम प्रतीत होगा। इसलिये पाठक प्रतिदिन थोडा थोडा अभ्यास करते जायँ, शेष बात स्वयं बनती जायगी।

पाठ १०

संस्कृत–वाक्यानि ।

१ अध्यर्धयोजनं गत्वा सरय्वाः तीरे विश्वामित्रः रामं अब्रवीत् । २ गृहाण सलिलम् । ददामि त्वां मन्त्रं विद्ये च बलां अतिबलां च । ३ रामः अपि जलं स्पृष्ट्वा प्रहृष्टवदनः तत् सर्वं प्रतिजग्राह । ४ विद्यायुक्तः रामः शरदि दिवाकर इव शुशुभे । ५ विश्वामित्रेण सह रामलक्ष्मणौ गंगासरय्वोः शुभे संगमे ऋषीणां पुण्यं आश्रमस्थानं ददृशाते । ६ मुनयः च शुभां नावं उपस्थाप्य विश्वामित्रं अब्रुवन् । ७ आरोहतु भवान् नावं राजकुमारपुरस्कृतः ।

८ मा अभूत् कालस्य विपर्ययः । ९ विश्वामित्रः रामलक्ष्मणाभ्यां सहितः नदीं ततार । १० रामः घोरं वनं दृष्ट्वा विश्वामित्रं पप्रच्छ । ११ अहो ! शोभनं वनं परं किं दारुणम् ? १२ विश्वामित्रः उवाच– हे क्षत्रियकुमार ! अस्मिन् घोरे वने ताटिका नाम्नी राक्षसी वसति । १३ सा सुंदस्य राक्षसस्य भार्या । १४ अतिपराक्रमः मारीचः राक्षसः अस्याः पुत्रः । १५ सा इयं ताटिका अस्मिन् वने अस्ति । १६ इदानीं अस्याः वनं एव अस्माभिः गन्तव्यम् । १७ अतः मम आदेशात् बाहुबलं आश्रित्य इमां जहि ।

१८ 'कुरु इमं देशं निष्कण्टकम् । १९ नहि कः अपि इमं देशं साम्प्रतं आगन्तुं शक्तः । २० स्त्रीवधे त्वया घृणा न कार्या । २१ चातुर्वर्ण्यहितार्थाय देशस्य हिताय प्रजासंरक्षणाय च राजसूनुना एतत् कर्तव्यं एव । ' २२ एतत् विश्वामित्रवचनं श्रुत्वा, रामः धनुर्मध्ये मुष्टिं बध्वा शब्देन दिशः नादयन् , तीव्रं ज्याघोषं अकरोत् । २३ तत् शब्दं श्रुत्वा राक्षसी क्रोधेन मूर्च्छिता अभवत् । २४ यत्र ज्याघोषः जातः तत्र अभ्यद्रवत् च ।

भाषा—वाक्य ।

१ आधा योजन जाकर सरयू नदीके तटपर विश्वामित्र रामसे बोला । २ 'लो जल । देता हूं तुमको मन्त्र और बला तथा अतिबला नामक दो विद्या'। ३ रामने भी जलको स्पर्श करके आनन्दित वदनसे उस सबको किया । ४ विद्यायुक्त राम शरदृतुमें सूर्यके समान शोभने लगा । ५ विश्वामित्रके साथ राम और लक्ष्मण गंगा और सरयूके शुभ संगमपर ऋषियोंका पुण्य आश्रमस्थान देखते रहे । ६ मुनि भी शुभ नौकाको लाकर विश्वामित्रसे बोले । ७ 'चढें आप नौकापर राजकुमारोंको आगे करके। '

८ मत होवे समयका अतिक्रमण। ९ विश्वामित्र रामलक्ष्मणोंके साथ नदीके पार हुआ। १० रामने घोर वन देखकर विश्वामित्रसे पूछा । ११ "अजी ! सुंदर वन है, परंतु क्यों भयानक है ? ' १२ विश्वामित्र बोला--'हे क्षत्रियके पुत्र ! इस वनमें भयङ्कर ताटिका नामक राक्षसी रहती है । १३ वह सुन्द राक्षसकी पत्नी है । १४ अतिपराक्रमी मारीच राक्षस इसका पुत्र है। १५ वह यह राक्षसी इस वनमें है । १६ अब इसके वनमें ही हमें जाना है । १७ इसलिये मेरे आदेशसे बाहुबलका आश्रय कर और इसे मार ।'

१८ 'कर इस देशको (निष्कण्टकं) शत्रुरहित । १९ नहीं कोई भी इस देशको इस समय आनेमें समर्थ है । २० स्त्रीका वध करनेमें तूने घृणा नहीं करनी । २१ चातुर्वर्ण्यके हितके लिये, देशके हितके लिये तथा प्रजाकी रक्षाके लिये राजपुत्रको यह करना ही चाहिये। ' २२ यह विश्वामित्रका भाषण सुनकर, रामने धनुष्यके मध्यमें मुट्ठी बांधकर, शब्दसे दिशाओंको नादित करके डोरीका बडा आवाज किया। २३ वह शब्द सुनके राक्षसी क्रोधसे मूर्च्छित् हो गई । २४ जहां (उआ) धनुष्यकी डोरीका (घोषः) शब्द हुआ वहां दौडकर आगई ।

पाठक इस पाठको वारंवार पढें और इसमें आये संस्कृत वाक्य पुनः पुनः पढकर अच्छी प्रकार तैयार करें ।

पाठक इस पाठके साथ साथ पूर्व पाठमें आये हुए रामायणके पाठ वारंवार जितना पढ सकें उतना पढें। पढनेके समय इतना ध्यान रखें कि वाक्योंमें विभिन्न शब्दोंपर जोर देकर पढें।

यदि पाठक इस तरह अभ्यास करेंगे तो उन्हें संस्कृत भाषाका ज्ञान शीघ्र होगा।

संधि किये हुए वाक्य।

१ सर्वे जना निरामयाः सन्तु। सन्तु सर्वे जना निरामयाः। निरामयाः सन्तु सर्वे जनाः।

२ सर्वे मानवाः सुखिनः सन्तु। सन्तु सर्वे मानवाः सुखिनः। सर्वे सुखिनो मानवाः सन्तु।

३ सर्वे भद्राणि पश्यन्तु। न कश्चिद्दुःखमाप्नुयात्। दुःखं कश्चिन्नाप्नुयात्सर्वे भद्राणि पश्यन्तु।

४ दर्शनादेव हि मे मनस्त्वयाऽपहृतम्। त्वयाऽपहृतं मे मनो दर्शनादेव। मे मनस्त्वयाऽपहृतं दर्शनादेव।

५ अहं त्वां ज्ञातुमिच्छामि। ज्ञातुमिच्छाम्यहं त्वाम्। त्वामहमिच्छामि ज्ञातुम्। इच्छाम्यहं त्वां ज्ञातुम्।

६ सर्वदा सत्यं भाषणमेव श्रेयस्करं भवति। भवति सर्वदा सत्यमेव भाषणं श्रेयस्करम्। श्रेयस्करं भवति सर्वदा सत्यमेव भाषणम्। सत्यमेव भाषणं सर्वदा भवति श्रेयस्करम्।

७ महामुनिर्विश्वामित्रो दशरथं राजानं किमवदत्। किमवदन्महामुनिर्विश्वामित्रो राजानं दशरथम्?

पाठ ११

शकुन्तलोवाच ।

कण्वस्याहं भगवतो दुष्यन्त दुहिता मता ।
तपस्विनो धृतिमतो धर्मज्ञस्य महात्मनः ॥ १५ ॥

पदानि— कण्वस्य । अहं । भगवतः । दुष्यन्तः । दुहिता । मता । तपस्विनः । धृतिमतः । धर्मज्ञस्य । महात्मनः ।

अन्वयः— हे दुष्यन्त ! महात्मनः धर्मज्ञस्य धृतिमतः तपस्विनः भगवतः कण्वस्य अहं दुहिता मता ॥

अर्थः— हे दुष्यन्त ! महात्मा, धर्मके जानकार, धैर्यवान् तपस्वी भगवान् कण्वकी मैं (दुहिता) पुत्री (मता) मानी हुई हूं ॥

दुष्यन्त उवाच ।

ऊर्ध्वरेता महाभागे भगवाँल्लोकपूजितः ।
चलेद्धि वृत्ताद्धर्मोऽपि न चलेत्संशितव्रतः ॥ १६ ॥

पदानि— ऊर्ध्वरेता । महाभागः । भगवान् । लोकपूजितः । चलेत् । हि । वृत्तात् । धर्मः । अपि । न । चलेत् । संशितव्रतः ।

अन्वयः— हे महाभागे ! लोकपूजितः भगवान् ऊर्ध्वरेताः । धर्मः अपि वृत्तात् चलेत् हि संशितव्रतः न चलेत् ॥

अर्थ— हे महाभाग्यवती ! लोगोंमें सन्मान्य भगवान् ऊर्ध्वरेता है । धर्म भी (वृत्तात्) चरित्रसे चलित होगा [परन्तु] (संशितव्रतः) व्रत पालन करनेवाला (कण्व) नहीं चलित होगा ॥

कथं त्वं तस्य दुहिता संभूता वरवर्णिनी ।
संशयो मे महानत्र तन्मे छेत्तुमिहार्हसि ॥ १७ ॥

पदानि— कथं । त्वं । तस्य । दुहिता । संभूताः । वरवर्णिनी । संशयः । मे । महान् । अत्र । तत् । मे । छेत्तुम् । इह । अर्हसि ।

अन्वयः— त्वं वरवर्णिनी तस्य दुहिता कथं संभूता ? मे अत्र महान् संशयः । इह मे तत् छेत्तुं अर्हसि ॥

अर्थ— तू सुन्दर रूपवाली उसकी पुत्री कैसी बनी ? मुझे यहां बडा संशय है । यहां मेरा वह (संशय) छेदन करनेके लिये तू योग्य हो ।

शकुन्तलोवाच ।

ऋषिः कश्चिदिहागम्य मम जन्माभ्यचोदयत् ।
तस्मै प्रोवाच भगवान्यथा तच्छृणु पार्थिव ॥ १८ ॥

पदानि— ऋषिः । कः । चित् । इह । आगम्य । मम । जन्म । अभ्यचोदयत् । तस्मै । प्र । उवाच । भगवान् । यथा । तत् । शृणु । पार्थिव ॥

अन्वयः— कश्चित् ऋषिः इह आगम्य मम जन्म अभ्यचोदयत् । हे पार्थिव ! तस्मै भगवान् यथा प्रोवाच तत् शृणु ॥

अर्थ— कोई एक ऋषि यहां आकर मेरे जन्मके विषयमें पूछने लगा । हे राजा ! उसके लिये भगवान् [ऋषि] ने जैसा कहा, वह सुनो ॥

तप्यमानः किल पुरा विश्वामित्रो महत्तपः ।
सुभृशं तापयामास शक्रं सुरगणेश्वरम् ॥ २० ॥

पदानि— तप्यमानः । किल । पुरा । विश्वामित्रः । महत् । तपः । सुभृशं । तापयामास । शक्रं । सुरगणः । ईश्वरः ।

अन्वयः— पुरा किल विश्वामित्रः तपः तप्यमानः सुरगणेश्वरं शक्रं सुभृशं तापयामास ॥

अर्थ— पूर्व समयमें निश्चयसे विश्वामित्र बडा तप तपता हुआ (सुर-गण-ईश्वरं) देवोंके गणोंके ईश (शक्रं) इन्द्रको विशेष ताप देने लगा ॥

अथापश्यद्वरारोहा तपसा दग्धकिल्बिषम् ।
विश्वामित्रं तप्यमानं मेनका भीरुराश्रमे ॥ २१ ॥

(म० भा० आदि० ७२)

पदानि— अथ । अपश्यत् । वरारोहा । तपसा । दग्धकिल्बिषं । विश्वामित्रं । तप्यमानं । मेनका । भीरुः । आश्रमे ॥

अन्वयः— अथ वरारोहा भीरुः मेनका आश्रमे तपसा दग्धकिल्बिषं तप्यमानं विश्वामित्रं अपश्यत् ।

अर्थ— अनंतर सुंदरी (भीरुः) लज्जासे डरनेवाली मेनकाने आश्रममें तपसे जिसके पाप जले हैं ऐसे तपनेवाले विश्वामित्रको देखा ।

रममाणौ यथाकामं यथैकदिवसं तथा ।
जनयामास स मुनिर्मेनकायां शकुन्तलाम् ॥ ९ ॥

पदानि— रममाणौ । यथाकामं । यथा । एकदिवसं । तथा । जनयामास । सः । मुनिः । मेनकायां । शकुन्तलाम् ॥

अन्वयः— यथा एकदिवसं तथा यथाकामं रममाणौ । सः मुनिः मेनकायां शकुन्तलां जनयामास ॥

अर्थ— जैसा एक दिन होता है वैसा ही यथेच्छ [दोनों] रममाण हुए और उस मुनिने मेनकामें शकुन्तलाको जन्म दिया ।

भावार्थ— मेनका और विश्वामित्र बहुत काल ऐसे रममाण हुए और उनका समय ऐसा शीघ्र व्यतीत हुआ जैसा कि एक दिन व्यतीत होता है । (यह आशय श्लोकके प्रथम अर्धका है) ।

निर्जने तु वने यस्माच्छकुन्तैः परिपालिता ।
शकुन्तलेति नामास्याः कृतं चापि ततो मया ॥ १६ ॥

पदानि— निर्जने । तु । वने । यस्मात् । शकुन्तैः । परिपालिता । शकुन्तला । इति । नाम । अस्याः । कृतं । च । अपि । ततः । मया ।

अन्वयः— यस्मात् निर्जने वने शकुन्तैः परिपालिता । ततः अस्याः नाम शकुन्तला इति च अपि मया कृतम् ॥

अर्थ— जिस कारण निर्जन वनमें शकुन्त पक्षियोंद्वारा इसका पालन हुआ (ततः) उस कारण इसका नाम शकुन्तला ऐसा मैंने किया ।

पाठ समाप्त करनेके पश्चात् पाठक केवल संस्कृत श्लोक ही कई वार पढ़ें और उनको आशय समझनेका यत्न करें।

संधि किये हुए वाक्य।

शकुन्तलोवाच।

हे दुष्यन्त! महात्मनो धर्मज्ञस्य धृतिमतस्तपस्विनो भगवतः कण्वस्याहं दुहिता मता।

दुष्यन्त उवाच- हे महाभागे! लोकपूजितो भगवानूर्ध्वरेताः। धर्मोऽपि वृत्ताच्चलेद्धि संशितव्रतो न चलेत्। त्वं वरवर्णिनी तस्य दुहिता कथं संभूता? मेऽत्र महान् संशयः, इह मे तच्छेत्तुमर्हसि।

पाठ १२

पूर्व दोनों पाठोंमें जो वाक्य दिये हैं, उनका सन्धि बनाकर सरल संस्कृत इस पाठमें दिया जाता है। पाठक इसका ठीक अभ्यास करें।

रामायण कथा।

अध्यर्धयोजनं गत्वा सरय्वास्तीरे विश्वामित्रो राममब्रवीत्। गृहाण सलिलम्। ददामि त्वां मन्त्रं विद्यं च बलामतिबलां च। रामोऽपि जलं स्पृष्ट्वा प्रहृष्टवदनस्तत्सर्वं प्रतिजग्राह। विद्यायुक्तो रामः शरदि दिवाकर इव शुशुभे। विश्वामित्रेण सह रामलक्ष्मणौ गंगासरय्वोः शुभे संगमे ऋषीणां पुण्यमाश्रमस्थानं ददृशाते। मुनयश्च शुभां नावमुपस्थाप्य विश्वामित्रमब्रुवन्। आरोहतु भवान्नावं राजकुमारपुरस्कृतः। माऽभूत्कालस्य विपर्ययः। विश्वामित्रो रामलक्ष्मणाभ्यां सहितो नदीं ततार।

रामो घोरं वनं दृष्ट्वा विश्वामित्रं पप्रच्छ, अहो! शोभनं वनं परं किं दारुणम्? विश्वामित्र उवाच- हे क्षत्रियकुमार! असि-

ने घोरा ताटिका नाम्नी राक्षसी वसति । सा सुंदस्य राक्षसस्य भार्या । अतिपराक्रमो मारीचो राक्षसः अस्याः पुत्रः । सेयं ताटिकाऽस्मिन्वनेऽस्ति । इदानीमस्या वनमेवास्माभिर्गन्तव्यम् । अतो ममोपदेशाद्वाहुवलमाश्रित्येमां जहि । कुरु चेमं देशं निष्कंटकम् । न हि कोऽपीमं देशं साम्प्रतमागन्तुं शक्तः । स्त्रीवधे त्वया घृणा न कार्या । चातुर्वर्ण्यहितार्थाय देशस्य हिताय प्रजासंरक्षणाय च राजसूनुनैतत्कर्तव्यमेव । एतद्विश्वामित्रवचनं श्रुत्वा रामो धनुर्मध्ये मुष्टिं वध्वा शब्देन दिशो नादयन्, तीव्रं ज्याघोषमकरोत् । तच्छब्दं श्रुत्वा राक्षसी क्रोधेन मूर्च्छिताऽभवत् । यत्र ज्याघोषो जातस्तत्राभ्यद्रवच्च ।

इसमें जो संधि सुगमतासे पाठकोंको नहीं खुलेंगे, उनको पूर्व पाठमें देखकर समझनेका यत्न पाठक करें । इस प्रकार अभ्यास करनेसे पाठकोंको संधि बनाना तथा संधि खोलना सुगमताके साथ आ जायगा ।

अब पूर्व पाठके श्लोकोंका सरल संस्कृत दिया जाता है । उसका भी पाठक पूर्ववत् अभ्यास करें—

संस्कृत–वाक्यानि ।

हे दुष्यन्त ! महात्मनो धर्मज्ञस्य धृतिमतस्तपस्विनो भगवतः कण्वस्याहं दुहिता मता ।

दुष्यन्त उवाच – हे महाभागे ! लोकपूजितो भगवानूर्ध्वरेताः कण्वः । धर्मोऽपि वृत्ताच्चलेद्धि, संशितव्रतः कण्वो न चलेत् । त्वं वरवर्णिनी तस्य दुहिता कथं संभूता ? मेऽत्र महान्संशयः । इह मे तच्छेत्तुमर्हसि ।

शकुन्तलोवाच – कश्चिद्दृषिरिहागम्य मम जन्माभ्यचोदयत् । हे पार्थिव दुष्यन्त ! तस्मै भगवान्यथा प्रोवाच तच्छृणु ।

पुरा किल विश्वामित्रो महत्तपस्तप्यमानः सुरगणेश्वरं शक्रं सुभृशं तापयामास । अथ वरारोहा मेनकाऽऽश्रमे तपसा

दग्धकिल्बिषं तप्यमानं विश्वामित्रमपश्यत्। यथैकादिवसं तथा यथाकामं रममाणौ। स मुनिर्मेनकायां शकुन्तलां जनयामास। यस्मान्निर्जने वने शकुन्तैः परिपालिता ततः अस्या नाम शकुन्तलेति चापि मया कृतम्।

इसमें यदि संधि खोलनेमें कुछ कठिनता पाठकोंको हुई तो पूर्व पाठके श्लोक देखकर उस कठिनताकी निवृत्ति कर सकते हैं।

प्रश्नाः।

१ सरय्वाः तीरे विश्वामित्रः रामं किं अब्रवीत्? २ ततः रामेण किं कृतम्? रामेण का विद्या प्राप्ता? ३ केन सा विद्या रामाय दत्ता? ४ नदीतीरे कस्य आश्रम आसीत्? ५ विश्वामित्रः कथं नदीं ततार? ६ नदीपारं गत्वा रामेण किं दृष्टम्? तत् वनं कथं आसीत्? ७ विश्वामित्रेण किं कथितम्? ८ तस्मिन् वने का राक्षसी आसीत्? तस्याः नाम किम्? ९ सा कस्य भार्या? तस्याः कः पुत्रः? १० राजपुत्रेण देशस्य हिताय किं कर्तव्यम्? ११ रामेण किं कृतम्?

पाठक इन प्रश्नोंका उत्तर संस्कृतमें ही देनेका यत्न करें। पूर्व पाठके तथा इस पाठके संस्कृत वाक्योंमें इनके उत्तर हैं। यदि आपने यह पाठ ठीक बना लिया है, तो आप उचित उत्तर दे सकेंगे।

संधि किये हुए वाक्य।

मे भगवान् पिता कण्वः फलान्याहर्तुमाश्रमाद्गतः। कण्वो मे भगवान्पिता फलान्याहर्तुमाश्रमाद्गतः। आश्रमाद्गतो मे पिता भगवान्कण्वः फलान्याहर्तुम्।

तं राजानं सुमधुराक्षरमिदं वाक्यमुवाच। सुमधुराक्षरमिदं वाक्यं तं राजानमुवाच। उवाच तं राजानमिदं सुमधुराक्षरमिदं वाक्यम्।

पाठ १३

इस पाठमें कुछ संधिके वाक्य खोलकर बताये जाते हैं। इनको देखकर संधि खोलनेका ज्ञान होगा। इसलिये इस दृष्टिसे इसका अभ्यास पाठक करें।

ततोऽगच्छन्महाबाहुः = ततः। आगच्छत्। महाबाहुः।
एकोऽमात्यान्विसृज्यतान् = एकः। अमात्यान्। विसृज्य। तान्।
नापश्यच्चाश्रमे तस्मिन् = न। अपश्यत्। च। आश्रमे। तस्मिन्।
तमृषिं संशितव्रतम् = तं। ऋषिं। संशितव्रतम्।
सोऽपश्यमानस्तमृषिम् = सः। अपश्यमानः। तं। ऋषिम्।
क इहेत्युच्चैर्वनं सन्नादयन्निव = कः। इह। इति। उच्चैः। वनं। सन्नादयन्। इव।

ततः अगच्छत् = ततोऽगच्छत्।
अगच्छत् महाबाहुः = अगच्छन्महाबाहुः।
महाबाहुः एकः = महाबाहुरेकः।
एकः अमात्यान् = एकोऽमात्यान्।
न अपश्यत् = नापश्यत्।
अपश्यत् च = अपश्यच्च।
च आश्रमे = चाश्रमे।
सः अपश्यमानः = सोऽपश्यमानः।
पश्यमानः तं = पश्यमानस्तं।
कः इह = क इह।
इह इति = इहेति।
इति उच्चैः = इत्युच्चैः।
उच्चैः वनं = उच्चैर्वनं।
सन्नादयन् इव = सन्नादयन्निव।
ततः+अगच्छत् = ततोऽगच्छत्।
अगच्छत्+महाबाहु = अगच्छन्महाबाहु।

इस प्रकार पाठक संधियोंको खोलनेका यत्न करें। इस पुस्तकमें कई पाठोंमें सन्धि बनाकर संस्कृत वाक्य दिये हैं। उनको खोलनेका यत्न करनेसे पूर्वोक्त नियमोंका अनुभव हो सकता है। एक समय ये नियम ठीक प्रकार समझमें आ जायेंगे, तो फिर भूलते ही नहीं। अब और देखिये—

प्रभावशालिनः महात्मनः — प्रभावशालिनो महात्मनः।
महात्मनः राज्ञः — महात्मनो राज्ञः।
राज्ञः धर्मज्ञस्य — राज्ञो धर्मज्ञस्य।
सुतः न — सुतो न।
न आसीत् — नासीत्।
यजामि इति — यजामीति।
गुरुन् शीघ्रं — गुरूञ्छीघ्रम्।
अत्र आनय — अत्रानय।
आनीतान् तान् — आनीताँस्तान्।
तत् अर्थं — तदर्थम्।
नामकः यज्ञः — नामको यज्ञः।
तत् वचनं — तद्वचनम्।
सर्वे अपि — सर्वेऽपि।
यज्ञस्य अन्ते — यज्ञस्यान्ते।
तथा इति — तथेति।
इति उक्त्वा — इत्युक्त्वा।
पायसः राज्ञा — पायसो राज्ञा।
प्रीतः राजा — प्रीतो राजा।
तस्मात् यज्ञात् — तस्माद्यज्ञात्।
गृहीत्वा अन्तःपुरं — गृहीत्वाऽन्तःपुरम्।
गृह्णीष्व इति — गृह्णीष्वेति
पायसस्य अर्धं — पायसस्यार्धम्।

सुमित्रायै अवशिष्टं = सुमित्राया अवशिष्टम् ।
ततः ताः = ततस्ताः ।
उत्सवः आसीत् = उत्सव आसीत् ।
लक्ष्मणः रामस्य = लक्ष्मणो रामस्य ।
भरतस्य अनुगामी = भरतस्यानुगामी ।
प्रियकरः तथा = प्रियकरस्तथा ।
अभवन् तदा = अभवँस्तदा ।

इसमें शब्दोंके संधि किस प्रकार बनते हैं यह बताया है। इनके संधि किन नियमोंके अनुसार बने हैं, यह भी पाठक देखें और विचार करें। ऐसा करनेसे संधिविषय पाठकोंको ठीक ठीक ज्ञात हो सकता है।

जो जो श्लोक दिये हैं, इनके अन्दर संधि अवश्य देखा करें और खोलना और बनाना भी समझ लें। थोडासा प्रयत्न करनेसे इस विषयमें पाठकोंकी प्रगति हो सकती है।

संधि किये हुए वाक्य।

१ तत्र तमृषिमपश्यमानस्तां शकुन्तलां स राजोवाच। स राजा तां शकुन्तलामुवाच तमृषिं तत्रापश्यमानः। ऋषिं तमपश्यमानस्तत्र तां शकुन्तलामुवाच स राजा।

२ तस्य यज्ञस्यान्ते राजा दशरथ ऋष्यशृङ्गमब्रवीत्। यज्ञस्य तस्यान्ते दशरथो राजाऽब्रवीदृष्यशृङ्गम्।

पाठ १४

रामायण कथा।

१ रामं रजोमेघेन सा ताटिका राक्षसी मुहूर्तं व्यामोहयत्। २ परन्तु पश्चात् तां ताटिकां रामः शरेण उरसि विव्याध। ३ तेन सा पपात ममार च। ४ ततः ताटिकावधेन तुष्टः मुनिवरः विश्वा-

मित्रः रामं उवाच । ५ 'हे राजपुत्र ! सर्वथा परितुष्टः अस्मि ते अनेन शौर्येण । ६ अतः ते सर्वाणि अपि अस्त्राणि प्रीत्या प्रयच्छामि । ७ तैः अस्त्रैः समन्वितः युद्धे शत्रून् जेष्यसि । ८ इति उक्त्वा स विप्रः रामाय तानि सर्वाणि एव अस्त्राणि न्यवेदयत् । ९ ततः स विश्वामित्रः रामं लक्ष्मणं च प्रगृह्य स्वकीयं सिद्धाश्रमं प्राविशत् । १० तत्र मुहूर्तं विश्रान्तौ रामलक्ष्मणौ 'मुनिश्रेष्ठः यज्ञदीक्षां प्रविशतु ' इति तं अनुबबन्धतुः । ११ तत् श्रुत्वा सर्वे अपि मुनयः रामलक्ष्मणौ प्रशशंसुः । १२ अद्य प्रभृति षड्रात्रं रक्षतां युवां इति च ऊचुः । १३ तौ अपि यत्तौ षड् अहोरात्रं तपोवनं अरक्षताम् । १४ षष्ठ्यां रात्रौ मायां कुर्वाणौ अभ्यधावताम् । १५ परमक्रुद्धः रामः मारीचस्य राक्षसस्य उरसि मानवं अस्त्रं चिक्षेप । १६ तेन अस्त्रेण मारीचः सागरे क्षिप्तः । १७ मारीचं सागरे क्षिप्तं दृष्ट्वा सुबाहोः उरसि आग्नेयं अस्त्रं चिक्षेप । १८ सः अपि सुबाहुः अस्त्रेण विद्धः भुवि प्रापतत् । १९ रामः अपि वायव्यास्त्रेण शेषान् राक्षसान् जघान । २० एवं निर्विघ्नतया समाप्ते यज्ञे विश्वामित्रः दिशः राक्षसहीनाः दृष्ट्वा रामं अब्रवीत् । २१ 'कृतार्थः अस्मि महाबाहो ! '। २२ मिथिलोपवने तु तत्र निर्जनं आश्रमपदं दृष्ट्वा राघवः पप्रच्छ 'कस्य अयं आश्रमः ? ' २३ विश्वामित्रः उवाच । २४ 'अत्र पुरा अहल्यासहितः गौतमः तपः आतिष्ठत् । २५ एष गौतमस्य महर्षेः रम्यः आश्रमः । '

भाषा--वाक्य ।

१ रामको (रजः--मेघेन) धूलिके बादलसे उस ताटिका राक्षसीने (मुहूर्तं) थोडी देर (व्यमोहयत्) मोहित किया । २ परंतु पश्चात् उस ताटिकाको रामने बाणसे (उरसि) छातीमें (विव्याध) वेध किया । ३ उससे वह गिरी और मर गई । ४ पश्चात् ताटिकाके वधसे संतुष्ट बना हुआ मुनिश्रेष्ठ विश्वामित्र रामसे बोला । ५ 'हे राजपुत्र ! सर्वथा संतुष्ट हुआ हूं तेरे इस

शौर्यसे । ६ इसलिये तुझे सभी अस्त्र प्रेमसे देता हूं । ७ उन अस्त्रोंसे युक्त होकर युद्धमें शत्रुओंको तू जीतेगा । ८ ऐसा कहकर उस ब्राह्मणने रामको वे सब अस्त्र निवेदन किये । ९ पश्चात् वह विश्वामित्र राम और लक्ष्मणको लेकर अपने सिद्धाश्रममें प्रविष्ट हुआ । १० वहां दो घडी विश्राम लेते हुए रामलक्ष्मण 'मुनिश्रेष्ठ यज्ञकी दीक्षामें प्रविष्ट होवे' ऐसा उसे कहने लगे । ११ वह सुनके सभी मुनि रामलक्ष्मणोंकी प्रशंसा करने लगे । १२ 'आजसे आगे छः रात्री रक्षण कीजिये आप दोनों,' ऐसा भी कहा गया । १३ (तौ) वे दोनों भी (यत्तौ) सिद्ध होकर छः अहोरात्र तपोवनकी रक्षा करते रहे । १४ छठी रात्रीमें (मायां) कपट करनेवाले दो राक्षसोंने धावा किया । १५ बडे क्रुद्ध रामने मारीच राक्षसकी छातीपर मानव अस्त्र (चिक्षेप) फेंका । १६ उस अस्त्रसे मारीच समुद्रमें फेंका गया । १७ मारीच समुद्रमें फेंका गया देखकर सुबाहुकी छातीमें आग्नेय अस्त्र फेंक दिया । १८ वह भी सुबाहु अस्त्रसे विद्ध होकर भूमिपर गिर गया । १९ रामने भी वायव्यास्त्रसे अवशिष्ट राक्षसोंको मारा । २० इस प्रकार निर्विघ्नतासे यज्ञ समाप्त होकर दिशाओंको राक्षसहीन देखकर विश्वामित्र रामसे बोला । २१ 'हे महाभुज राम ! मैं कृतार्थ हुआ हूं ।' २२ मिथिला नगरीके पासके उपवनमें (निर्जनं) जनहीन आश्रमस्थान देखकर रामने पूछा कि 'किसका यह आश्रम है ?' २३ विश्वामित्रने उत्तर दिया । २४ 'यहां पूर्वकालमें अहल्याके सहित गौतममुनि तप करते रहे । २५ यह गौतम ऋषिका रम्य आश्रम है ।

पाठक इस पाठको बडे ध्यानसे पढें । प्रायः पढते ही यह पाठ समझमें आ जायगा । यदि पढते ही समझमें नहीं आया तो थोडी बार अधिक पढिये । अधिक बार पढनेसे ही सब कठिनाइयाँ स्वयं दूर हो जाती हैं ।

इस पाठके साथ पूर्व स्थलमें आये हुए रामायणके पाठ भी पाठक पढें, तो संस्कृतभाषामें सुगमतासे प्रवेश हो सकता है ।

नारद उवाच—

एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति ।
स च दोषः प्रयत्नेन न शक्यमतिवर्तितुम् ॥

(म० भा० वन० २९१)

पदानि- नारदः। उवाच। एकः। एव। अस्य। दोषः। हि। गुणान्। आक्रम्य। तिष्ठति। सः। च। दोषः। प्रयत्नेन। न। शक्यं। अतिवर्तितुम् ॥

अन्वयः- नारदः उवाच। अस्य एकः एव दोषः गुणान् आक्रम्य तिष्ठति। च सः दोषः प्रयत्नेन अतिवर्तितुं न शक्यम् ॥

संधि किया हुआ अन्वय - अस्यैक एव दोषो गुणानाक्रम्य तिष्ठति। स च दोषः प्रयत्नेनातिवर्तितुं न शक्यम्।

अर्थ - नारद बोले- इसका एक ही दोष अनेक गुणोंको व्याप्त कर देता है और वह दोष प्रयत्नसे दूर करना शक्य नहीं है।

पाठ १५

इस पाठमें महाभारतके कुछ श्लोक देते हैं और अन्वयके साथ अर्थ देते हैं। पाठक इनका अच्छी प्रकार अभ्यास करें—

दुर्योधन उवाच।

आचार्यः पाण्डुपुत्रान्वै पुत्रवत्परिरक्षति।
त्वमप्युपेक्षां कुरुषे तेषु नित्यं द्विजोत्तम ॥ ८६ ॥

(म० भा० द्रोण अ० १५९)

पदानि— आचार्यः। पाण्डु-पुत्रान्। वै। पुत्रवत्। परिरक्षति। त्वम्। अपि। उपेक्षाम्। कुरुषे। तेषु। नित्यम्। द्विजोत्तम।

अन्वयः— हे द्विजोत्तम! आचार्यः पाण्डुपुत्रान् वै पुत्रवत् परिरक्षति। त्वं अपि तेषु नित्यं उपेक्षां कुरुषे।

अर्थ- हे ब्राह्मण श्रेष्ठ! आचार्य पण्डुके पुत्रोंका पुत्रवत् रक्षण करता है। और तूभी उनकी नित्य उपेक्षा करता है ॥

मम वा मन्दभाग्यत्वान्मन्दस्ते विक्रमो युधि ।
धर्मराजप्रियार्थं वा द्रौपद्या वा न विद्म तत् ॥ ८७ ॥

पदानि- मम । वा । मन्दभाग्यत्वात् । मन्दः । ते । विक्रमः । युधि । धर्मराजप्रियार्थं । वा । द्रौपद्याः । वा । न । विद्म । तत् ॥

अन्वयः- मम वा मन्दभाग्यत्वात् युधि ते विक्रमः मन्दः । धर्मराजप्रियार्थं वा द्रौपद्याः वा प्रियार्थं, न तत् विद्म ॥

अर्थः- मेरे मन्दभाग्यके कारण युद्धमें तेरा पराक्रम कम दीखता है, अथवा धर्मराजके हितके लिये, अथवा द्रौपदीके हितके लिये, यह हम नहीं जानते ॥

धिगस्तु मम लुब्धस्य यत्कृते सर्वबान्धवाः ।
सुखार्हाः परमं दुःखं प्राप्नुवन्त्यपराजितः ॥ ८८ ॥

पदानि— धिक् । अस्तु । मम । लुब्धस्य । यत्कृते । सर्वबान्धवाः । सुखार्हाः । परमम् । दुःखम् । प्राप्नुवन्ति । अ-पराजिताः ॥

अन्वयः— मम लुब्धस्य धिक् अस्तु । यत्कृते सुखार्हाः अपराजिताः सर्वबान्धवाः परमं दुःखं प्राप्नुवन्ति ॥

अर्थ- मुझ लोभीके लिये धिक्कार है । जिसके लिये सुख भोगनेके योग्य और कभी पराजित न हुए सब बंधुबान्धव परम दुःखको पा रहे हैं ।

को हि शस्त्रविदां मुख्यो महेश्वरसमो युधि ।
शत्रुं न क्षपयेच्छक्तो यो न स्याद्गौतमीसुतः ॥ ८९ ॥

पदानि— कः । हि । शस्त्रविदाम् । मुख्यः । महेश्वरसमः । युधि । शत्रुम् । न । क्षपयेत् । शक्तः । यः । न । स्यात् । गौतमीसुतः ॥

अन्वयः- कः हि शस्त्रविदां मुख्यः युधि महेश्वरसमः शक्तः शत्रुं न क्षपयेत् । यः गौतमीसुतः न स्यात् ॥

अर्थ- कौन भला शस्त्रधारियोंमें मुख्य, युद्धमें महादेवके समान समर्थ, शत्रुका नाश न करेगा, जो गौतमी पुत्र न होगा ।

अश्वत्थामन्प्रसीदस्व नाशयैतान्ममाहितान् ।
तवास्त्रगोचरे शक्ताः स्थातुं देवा न दानवाः ॥ १० ॥

पदानि— अश्वत्थामन् । प्रसीदस्व । नाशय । एतान् । मम । अहितान् । तव । अस्त्र-गोचरे । शक्ताः । स्थातुम् । देवाः । न । दानवाः ॥

अन्वयः— हे अश्वत्थामन् ! प्रसीदस्व । एतान् मम अहितान् नाशय । देवाः दानवाः तव शस्त्रगोचरे स्थातुं न शक्ताः ॥

अर्थ— हे अश्वत्थामा ! प्रसन्न हो । इन मेरे शत्रुओंका नाश कर । देव अथवा दानव तेरे बाणोंके सम्मुख ठहर नहीं सकते ॥

पञ्चालान्सोमकाँश्चैव जहि द्रोणे सहानुगान् ।
वयं शेषान्हनिष्यामस्त्वयैव परिरक्षिताः ॥ ११ ॥

पदानि— पञ्चालान् । सोमकान् । च । एव । जहि । द्रोणे । सहानुगान् । वयम् । शेषान् । हनिष्यामः । त्वया । एव । परिरक्षिताः ॥

अन्वयः— हे द्रोणे ! सहानुगान् पञ्चालान् सोमकान् एव च जहि । त्वया परिरक्षिताः वयं शेषान् हनिष्यामः ॥

अर्थ— हे द्रोणपुत्र ! अनुयायियोंके समेत पञ्चाल और सोमकोंका नाश कर । तेरे द्वारा रक्षित होकर हम अन्योंका वध करेंगे ॥

एते हि सोमका विप्र पञ्चालाश्च यशस्विनः ।
मम सैन्येषु संक्रुद्धा विचरन्ति दवाग्निवत् ॥ १२ ॥

पदानि— एते । हि । सोमकाः । विप्र । पञ्चालाः । च । यशस्विनः । मम । सैन्येषु । संक्रुद्धाः । विचरन्ति । दवाग्निवत् ॥

अन्वयः— हे विप्र ! हि एते सोमकाः यशस्विनः पञ्चालाः च संक्रुद्धाः मम सैन्येषु दवाग्निवत् विचरन्ति ॥

अर्थ— हे ब्राह्मण ! क्योंकि ये सोमक और यशस्वी पञ्चाल क्रोधित होकर मेरे सैन्योंमें दावाग्निके समान भ्रमण करते हैं ॥

तान्वारय महाबाहो केकयाँश्च नरोत्तम ।
पुरा कुर्वन्ति निःशेषं रक्ष्यमाणाः किरीटिना ॥ ९३ ॥

पदानि— तान् । वारय । महाबाहो । केकयान् । च । नरोत्तम । पुरा । कुर्वन्ति । निःशेषं । रक्ष्यमाणाः । किरीटिना ॥

अन्वयः— हे महाबाहो नरोत्तम ! किरीटिना रक्ष्यमाणाः निःशेषं कुर्वन्ति । पुरा तान् केकयान् च वारय ॥

अर्थ— हे महाबाहो मनुष्य श्रेष्ठ ! (किरीटिना) अर्जुन द्वारा रक्षित होकर (मेरे सैन्यको) समाप्त करनेसे पहले ही उन केकयोंका निवारण कर ॥

संधि किये हुए वाक्य ।

हे द्विजोत्तम ! आचार्यः पाण्डुपुत्रान्वै पुत्रवत्परिरक्षति । त्वमपि तेषु नित्यमुपेक्षां कुरुषे । मम वा मन्दभाग्यत्वाद्युधि ते विक्रमो मन्दः । धर्मराजप्रियार्थं वा द्रौपद्या वा प्रियार्थं न तद्वयं विद्मः । मम लुब्धस्य धिगस्तु ।

पाठ १६

अश्वत्थामँस्त्वरायुक्तो याहि शीघ्रमरिन्दम ।
आदौ वा यदि वा पश्चात्तवेदं कर्म मारिष ॥ ९४ ॥

पदानि— अश्वत्थामन् । त्वरायुक्तः । याहि । शीघ्रम् । अरिन्दम । आदौ । वा । यदि । वा । पश्चात् । तव । इदम् । कर्म । मारिष ॥

अन्वयः— हे अरिन्दम अश्वत्थामन् ! त्वरायुक्तः याहि हे मारिष ! आदौ वा यदि वा पश्चात् इदं तव कर्म ॥

अर्थ— हे शत्रुनाशक अश्वत्थामा ! त्वरासे युक्त होकर आगे बढ़ । हे श्रेष्ठ ! पहले अथवा पीछेसे यह तेरा कर्म है ॥

त्वमुत्पन्नो महाबाहो पञ्चालानां वधं प्रति ।
करिष्यसि जगत्सर्वमपञ्चालं किलोद्यतः ॥ ९५ ॥

पदानि– त्वम् । उत्पन्नः । महाबाहो । पञ्चालानाम् । वधम् । प्रति । करिष्यसि । जगत् । सर्वम् । अपञ्चालम् । किल । उद्यतः ।

अन्वयः– हे महाबाहो ! त्वं पञ्चालानां वधं प्रति उत्पन्नः । उद्यतः किल त्वं सर्वं जगत् अपञ्चालं करिष्यसि ।

अर्थ– हे महाबाहो ! तूं पंचालोंके वधके लिये उत्पन्न हुआ है । यदि तू उद्यत हुआ तो सब जगत्को पञ्चाल योद्धाओंसे रहित करेगा ॥

एवं सिद्धाऽब्रुवन्वाचो भविष्यति च तत्तथा ।
तस्मात्त्वं पुरुषव्याघ्र पञ्चालाञ्जहि सानुगान् ॥९६॥

पदानि– एवम् । सिद्धाः । अब्रुवन् । वाचः । भविष्यति । च । तत् । तथा । तस्मात् । त्वम् । पुरुषव्याघ्र । पञ्चालान् । जहि । सानुगान् ॥

अन्वयः– एवं वाचः सिद्धाः अब्रुवन् । तत् च तथा भविष्यति । हे पुरुषव्याघ्र ! तस्मात् त्वं सानुगान् पञ्चालान् जहि ॥

अर्थ – इस प्रकारका भाषण सिद्ध लोगोंने किया था । वह वैसा ही होगा । हे पुरुषश्रेष्ठ ! इसलिये तू अनुयायियोंके सहित पञ्चालोंका नाश कर ॥

न तेऽस्त्रगोचरे शक्ताः स्थातुं देवाः सवासवाः ।
किमु पार्थाः सपञ्चालाः सत्यमेतद्ब्रवीमि ते ॥९७॥

पदानि– न । ते । अस्त्रगोचरे । शक्ताः । स्थातुम् । देवाः । सवासवाः । किम् । उ । पार्थाः । सपञ्चालाः । सत्यम् । एतत् । ब्रवीमि । ते ॥

अन्वयः – सवासवाः देवाः ते अस्त्रगोचरे स्थातुं न शक्ताः किमु सपञ्चालाः पार्थाः ? एतत्ते सत्यं ब्रवीमि ॥

अर्थ– इन्द्रसहित देव तेरे अस्त्रोंके सम्मुख ठहर नहीं सकते। फिर पाञ्चालोंके समेत पांडव कैसे ठहरेंगे ? यह तुझे सत्य कहता हूं।

न त्वां समर्थाः संग्रामे पाण्डवाः सह सोमकैः।
बलाद्योधयितुं वीर सत्यमेतद्ब्रवीमि ते ॥ ९८ ॥

पदानि— न। त्वाम्। समर्थाः। संग्रामे। पाण्डवाः। सह। सोमकैः। बलात्। योधयितुम्। वीर। सत्यम्। एतत्। ब्रवीमि। ते।

अन्वयः— हे वीर सोमकैः सह पाण्डवाः संग्रामे त्वां बलात् योधयितुं न समर्थाः एतत् ते सत्यं ब्रवीमि ॥

अर्थ– हे वीर ! सोमकोंसे युक्त पाण्डव सग्राममें तेरे साथ बलसे युद्ध करनेके लिये समर्थ नहीं हैं। यह तुझे मैं सत्य कहता हूं ॥

गच्छ गच्छ महाबाहो न नः कालात्ययो भवेत्।
इयं हि द्रवते सेना पार्थसायकपीडिता ॥ ९९ ॥

पदानि— गच्छ। गच्छ। महाबाहो। न। नः। कालात्ययः। भवेत्। इयम्। हि। द्रवते। सेना। पार्थसायकपीडिता।

अन्वयः– हे महाबाहो ! गच्छ गच्छ। कालात्ययः नः न भवेत् पार्थ–सायकपीडिता हि इयं सेना द्रवते ॥

अर्थ— हे महाबाहो ! बढ, आगे बढ। हमारे लिये देरी न होवे। क्योंकि अर्जुनके बाणोंसे पीडित हुई यह सेना भाग रही है ॥

संधि किये हुए वाक्य।

हे द्विजोत्तम ! आचार्यः पाण्डुपुत्रान्वै पुत्रवत्परिरक्षति। त्वमपि तेषु नित्यमुपेक्षां कुरुषे। मम वा मन्दभाग्यत्वाद्युधि ते विक्रमो मन्दः। धर्मराजप्रियार्थं वा द्रौपद्या वा प्रियार्थं न तद्वयं विद्मः।

मम लुब्धस्य धिगस्तु । यत्कृते सुखार्हा अपराजिताः सर्वबान्धवाः परम दुःखं प्राप्नुवन्ति । को हि शस्त्रविदां मुख्यो युधि महेश्वरसमः शक्तः शत्रुं न क्षपयेद्यो गौतमीसुतः न स्यात् । हे अश्वत्थामन् ! प्रसीदस्व । एतान्ममाहितान्नाशय । देवा दानवा वा तवाऽस्त्रगोचरे स्थातुं न शक्ताः । हे द्रोणे ! सहानुगान्पञ्चालान्सोमकाँश्चैव जहि । त्वया परिरक्षिता वयं शेषान्हनिष्यामः । हे विप्र ! एते हि सोमका यशस्विनः पञ्चालाश्च संक्रुद्धा मम सैन्येषु दावाग्निवद्विचरन्ति । हे महाबाहो नरोत्तम ! किरिटिना रक्ष्यमाणास्ते मम सैन्यं निःशेषं करिष्यन्ति, तत्पूर्वं तान् केकयाँश्च वारय ।

हे अरिन्दम अश्वत्थामन् ! त्वरायुक्तो याहि । आदौ वा यदि वा पश्चादिदं तव कर्म । हे महाबाहो ! त्वं पञ्चालानां वधं प्रत्युत्पन्नः । त्वमुद्यतः किल सर्वं जगदपञ्चालं करिष्यसि । एवं वाचः सिद्धाः अब्रुवन् । तच्च तथा भविष्याति । हे पुरुषव्याघ्र ! तस्मात्त्वं सानुगान्पञ्चालान् जहि । स-वासवा देवास्तेऽस्त्रगोचरे स्थातुं न शक्ताः । किमु सपञ्चालाः पार्थाः ?

वेद-प्रवेश

(मरुद्देवताका मन्त्रसंग्रह)

'वेदप्रवेश' परीक्षाकी पाठविधि, ५०० मन्त्रोंकी पढाई। इसमें भी उपर्युक्त प्रकार मंत्र, अन्वय, अर्थ, भावार्थ और टिप्पणी है। मू. ५) रु.डा.व्य. ||।) रु.

आश्विनौ-देवताका मंत्रसंग्रह

इसमें भी मंत्र, पद, अन्वय, अर्थ, भावार्थ और टिप्पणी आदि हैं। इसम ६८९ मंत्र हैं। मूल्य ५) रु. डा. व्य. १) रु.

वेदपरिचय

(भाग १-२-३)

'वेदपरिचय' परीक्षाके लिये ये पुस्तक तैयार किये हैं। ये ग्रन्थ इतने सुबोध, सुपाठ्य और आसान बनाये हैं कि इनसे अधिक सुबोध पाठविधि होही नहीं सकती। सर्वसाधारण स्त्रीपुरुष भी अपना थोडासा नियत समय इस कार्यके लिये प्रतिदिन देंगे, तो ४-५ वर्षोंमें वे वेदज्ञ हो सकते है। इन तीन भागोंमें ३०० वेद-मंत्र हैं।

इनमें मंत्र, उसके पद, अन्वय, अर्थ, प्रत्येक पदका अर्थ, भावार्थ, मन्त्रका बोध, प्रत्येक पदके विशेष अर्थ, मन्त्रके पाठभेद, उनका अर्थ यह दिया है। प्रथम भाग मू. १॥); द्वितीय भाग मू. १॥); तृतीय भाग मू. २) रु.

वेदका स्वयं-शिक्षक, भाग १-२

जो पाठक प्रतिदिन आधा घंटा इसके अध्ययनके लिये देंगे, उनका प्रवेश वेदके मंदिरमें सुगमतासे हो सकता है। इसके दो भाग हैं। प्रत्येक भागका मू. १॥ रु. तथा डा. व्य. ।-)

मन्त्री- स्वाध्याय-मण्डल, 'आनंदाश्रम' किल्ला-पारडी, (सूरत)

श्रीमद्भगवद्गीता

टीका लेखक- पं० श्रीपाद दामोदर सातवळेकर

इस 'पुरुषार्थबोधिनी' भाषाटीकामें यह बात दर्शायी गयी है कि वेद, उपनिषद् आदि प्राचीन ग्रंथोंकेही सिद्धान्त गीतामें नये ढंगसे किस प्रकार कहे हैं। अतः इस प्राचीन परंपराको बताना इस 'पुरुषार्थबोधिनी' टीकाका मुख्य उद्देश है, अथवा यही इसकी विशेषता है।

गीताके १८ अध्याय ३ विभागोंमें विभाजित किये हैं और उनकी जिल्दें बनी हैं। मूल्य [illegible] रु. और डाकव्यय १॥) रु. है। [illegible] मनीआर्डरसे [illegible] रु. भेजनेवालोंको हम अपने व्ययसे भेज देंगे। प्रत्येक अध्यायका मू० ॥) और डा० व्यय ।-) है।

श्रीमद्भगवद्गीता-समन्वय।

'वैदिक धर्म' के आकारके १३६ पृष्ठ, चिकना कागज, सजिल्दका मू० २) रु०, डा० व्य० ।=) डा० व्यय सहित मूल्य भेज दीजिये।

भगवद्गीता-श्लोकार्धसूची।

इसमें श्रीगीताके श्लोकार्धोंकी अकारादिक्रमसे आद्याक्षरसूची है और उसी क्रमसे अन्त्याक्षरसूची भी है। मूल्य केवल ॥।-) डा. व्य. ।=)

भगवद्गीता लेखमाला।

'गीता' मासिकमें प्रकाशित गीताविषयक लेखोंका यह संग्रह है। इसके १,२,६,७ भाग तैयार हैं, जिनका मू. ५) रु. और डा. व्यय १॥) है।

मंत्री-स्वाध्याय-मण्डल, पारडी (जि० सूरत)